प्रमुचः स महाभागस्तस्मिन्नेव महीतले ॥ २६ ॥
तान्तु यौवनिनीं दृष्ट्वा कन्यकां रूपशालिनीं ।
स मुनिश्चिन्तयामास कोऽस्या भर्त्ता भवेदिति ॥ २७ ॥
एवं चिन्तयतस्तस्य ययौ कालो महान् मुने ।
न चाससाद सदृशं वरं तस्या महामुनिः ॥ २८ ॥
ततस्तस्या वरं प्रष्टुमग्निं स प्रमुचो मुनिः ।
विवेश वह्निशालां वै प्रष्टारं प्राह हव्यभुक् ॥ २९ ॥
महाबलो महावीर्य्यः प्रियवाग्धर्म्मवत्सलः ।
दुर्गमो नाम भविता भर्त्ता ह्यस्या महीपतिः ॥ ३० ॥

मार्कण्डेय उवाच ॥

अनन्तरञ्च मृगयाप्रसङ्गेनागतो मुने ।
तस्याश्रमपदं धीमान् दुर्गमः स नराधिपः ॥ ३१ ॥
प्रियव्रतान्वयभवो महाबलपराक्रमः ।
पुत्रो विक्रमशीलस्य कालिन्दीजठरोद्भवः ॥ ३२ ॥
स प्रविश्याश्रमपदं तां तन्वीं जगतीपतिः ।
अपश्यमानस्तमृषिं प्रियेत्यामन्त्र्य पृष्टवान् ॥ ३३ ॥

राजोवाच ॥

क्व गतो भगवानस्मादाश्रमान्मुनिपुङ्गवः ।
तं प्रणन्तुमिहेच्छामि तत् त्वं प्रब्रूहि शोभने ॥ ३४ ॥

मार्कण्डेय उवाच ॥

अग्निशालां गतो विप्रस्तच्छ्रुत्वा तस्य भाषितं ।
प्रियेत्यामन्त्रणञ्चैव निश्चक्राम त्वरान्वितः ॥ ३५ ॥

स ददर्श महात्मानं राजानं दुर्गमं मुनिः ।
नरेन्द्रचिह्नसहितं प्रश्रयावनतं पुरः ॥ ३६ ॥
तस्मिन् दृष्टे ततः शिष्यमुवाच स तु गौतमं ।
गौतमानीयतां शीघ्रमर्घोऽस्य जगतीपतेः ॥ ३७ ॥
एकस्तावदयं भूपश्चिरकालादुपागतः ।
जामाता च विशेषेण योग्योऽर्घस्य मतो मम ॥ ३८ ॥

मार्कण्डेय उवाच ॥

ततः स चिन्तयामास राजा जामातृकारणं ।
विवेद च न तन्मौनी जगृहेऽर्घञ्च तं नृपः ॥ ३९ ॥
तमासनगतं विप्रो गृहीतार्घं महामुनिः ।
स्वागतं प्राह राजेन्द्रमपि ते कुशलं गृहे ॥ ४० ॥
कोषे बलेऽथ मित्रेषु भृत्यामात्ये नरेश्वर ।
तथात्मनि महाबाहो यत्र सर्व्वं प्रतिष्ठितं ॥ ४१ ॥
पत्नी च ते कुशलिनी यत एवानुतिष्ठति ।
पृच्छाम्यस्यास्ततो नाहं कुशलिन्योऽपरास्तव ॥ ४२ ॥

राजोवाच ॥

त्वत्प्रसादादकुशलं न क्वचिन्मम सुव्रत ।
जातकौतूहलश्चास्मि मम भार्य्यात्र का मुने ॥ ४३ ॥

ऋषिरुवाच ॥

रेवती सुमहाभागा त्रैलोक्यस्यापि सुन्दरी ।
तव भार्य्या वरारोहा तां त्वं राजन्न वेत्सि किं ॥ ४४ ॥

राजोवाच ॥

सुभद्रां शान्ततनयां कावेरीतनयां विभो ।
सुराष्ट्रजां सुजाताञ्च कदम्बाञ्च वरूथजां ॥ ४५ ॥
विपाठां नन्दिनीञ्चैव वेद्मि भार्य्या गृहे द्विज ।
तिष्ठन्ति मे न भगवन्नेवतीं वेद्मि का न्वियं ॥ ४६ ॥

ऋषिरुवाच ॥

प्रियेति साम्प्रतं येयं त्वयोक्ता वरवर्णिनी ।
किं विस्मृतन्ते भूपाल श्लाघ्येयं गृहिणी तव ॥ ४७ ॥

राजोवाच ॥

सत्यमुक्तं मया किन्तु भावो दुष्टो न मे मुने ।
नाच कोपं भवान् कर्त्तुमर्हत्यस्मासु याचितः ॥ ४८ ॥

ऋषिरुवाच ॥

तत्त्वं ब्रवीषि भूपाल न भावस्तव दूषितः ।
आजहार भवानेतद्वह्निना नृप चोदितः ॥ ४९ ॥
मया पृष्टो हुतवहः कोऽस्या भर्त्तेति पार्थिव ।
भविता तेन चाप्युक्तो भवानेवाद्य वै वरः ॥ ५० ॥
तद्गृह्यतां मया दत्ता तुभ्यं कन्या नराधिप ।
प्रियेत्यामन्त्रिता चेयं विचारं कुरुषे कथं ॥ ५१ ॥

मार्कण्डेय उवाच ॥

ततोऽसावभवन्मौनी तेनोक्तः पृथिवीपतिः ।
ऋषिस्तथोद्यतः कर्त्तुं तस्या वैवाहिकं विधिं ॥ ५२ ॥
तमुद्यतं सा पितरं विवाहाय महामुने ।

उवाच कन्या यत्किञ्चित् प्रश्रयावनतानना ॥ ५३ ॥
यदि मे प्रीतिमांस्तात प्रसादं कर्त्तुमर्हसि ।
रेवत्यृक्षे विवाहं मे तत्करोतु प्रसादितः ॥ ५४ ॥

ऋषिरुवाच ॥

रेवत्यृक्षं न वै भद्रे चन्द्रयोगि व्यवस्थितं ।
अन्यानि सन्ति ऋक्षानि सुभ्रु वैवाहिकानि ते ॥ ५५ ॥

कन्योवाच ॥

तात तेन विना कालो विफलः प्रतिभाति मे ।
विवाहो विफले काले मद्विधायाः कथं भवेत् ॥ ५६ ॥

ऋषिरुवाच ॥

ऋतवागिति विख्यातस्तपस्वी रेवतीं प्रति ।
चकार कोपं क्रुद्धेन तेनर्क्षं विनिपातितं ॥ ५७ ॥
मया चास्मै प्रतिज्ञाता भार्येति मदिरेक्षणा ।
न चेच्छसि विवाहं त्वं सङ्कटं नः समागतं ॥ ५८ ॥

कन्योवाच ॥

ऋतवाक् स मुनिस्तात किमेवं तप्तवांस्तपः ।
न त्वया मम तातेन ब्रह्मबन्धोः सुतास्मि किं ॥ ५९ ॥

ऋषिरुवाच ॥

ब्रह्मबन्धोः सुता न त्वं बाले नैव तपस्विनः ।
सुता त्वं मम यो देवान् कर्त्तुमन्यान् समुत्सहे ॥ ६० ॥

कन्योवाच ॥

तपस्वी यदि मे तातस्तत्किमृक्षमिदं दिवि ।

समारोप्य विवाहो मे तदृक्षे क्रियते न तु ॥ ६१ ॥

ऋषिरुवाच ॥

एवं भवतु भद्रन्ते भद्रे प्रीतिमती भव ।
आरोपयामीन्दुमार्गे रेवत्यृक्षं कृते तव ॥ ६२ ॥

मार्कण्डेय उवाच ॥

ततस्तपःप्रभावेन रेवत्यृक्षं महामुनिः ।
यथा पूर्वन्तथा चक्रे सोमयोगि द्विजोत्तम ॥ ६३ ॥
विवाहञ्चैव दुहितुर्विधिवत् मन्त्रयोगिनं ।
निष्पाद्य प्रीतिमान् भूयो जामातारमथाब्रवीत् ॥ ६४ ॥
औद्वाहिकन्ते भूपाल कथ्यतां किं ददाम्यहं ।
दुर्लभ्यमपि दास्यामि ममाप्रतिहतन्तपः ॥ ६५ ॥

राजोवाच ॥

मनोः स्वायम्भुवस्याहमुत्पन्नः सन्ततो मुने ।
मन्वन्तराधिपं पुत्रं त्वत्प्रसादात् वृणोम्यहं ॥ ६६ ॥

ऋषिरुवाच ॥

भविष्यत्येष ते कामो मनुस्त्वत्तनयो महीं ।
सकलां भोक्ष्यते भूप धर्मविच्च भविष्यति ॥ ६७ ॥

मार्कण्डेय उवाच ॥

तामादाय ततो भूपः स्वमेव नगरं ययौ ।
तस्मादजायत सुतो रेवत्यां रैवतो मनुः ॥ ६८ ॥
समेतः सकलैर्धर्म्मैर्मानवैरपराजितः ।
विज्ञाताखिलशास्त्रार्थो वेदविद्यार्थशास्त्रवित् ॥ ६९ ॥

तस्य मन्वन्तरे देवान् मुनिदेवेन्द्रपार्थिवान् ।
कथ्यमानान्मया ब्रह्मन् निबोध सुसमाहितः ॥ ७० ॥
सुमेधसस्तच देवास्तथा भूपतयो द्विज ।
वैकुण्ठश्चामिताभश्च चतुर्द्दश चतुर्द्दश ॥ ७१ ॥
तेषां देवगणानान्तु चतुर्णामपि चेश्वर ।
नाम्ना विभुरभूदिन्द्रः शतयज्ञोपलक्षकः ॥ ७२ ॥
हिरण्यलोमा वेदश्रीरूर्द्ध्वबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ॥ ७३ ॥
वशिष्ठश्च महाभागो वेदवेदान्तपारगः ।
एते सप्तर्षयश्चासन् रैवतस्यान्तरे मनोः ॥ ७४ ॥
बलबन्धुर्महावीर्य्यः सुयष्टव्यस्तथापरः ।
सत्यकाद्यास्तथैवासन् रैवतस्य मनोः सुताः ॥ ७५ ॥
रैवतान्तास्तु मनवः कथिता ये मया तव ।
स्वायम्भुवाश्रया ह्येते स्वारोचिषमृतेर्मनुं ॥ ७६ ॥

इति श्रीमार्कण्डेयपुराणे रैवत मन्वन्तरं समाप्तं ॥ ७५ ॥

षट्सप्ततितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

इत्येतत्कथितं तुभ्यं पञ्च मन्वन्तरं तव ।
चाक्षुषस्य मनोः षष्ठं श्रूयतामिदमन्तरं ॥ १ ॥

अन्यजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः ।
चाक्षुषत्वमतस्तस्य जन्मन्यस्मिन्नपि द्विज ॥ २ ॥
जातं माता निजोत्सङ्गे स्थितमुल्लाप्य तं पुनः ।
परिष्वजति हार्द्देन पुनरुल्लापयत्यथ ॥ ३ ॥
जातिस्मरः स जातो वै मातुरुत्सङ्गमास्थितः ।
जहास तं तदा माता संक्रुद्धा वाक्यमब्रवीत् ॥ ४ ॥
भीतास्मि किमिदं वत्स हासो यद्वदने तव ।
अकालबोधः संजातः कच्चित्पश्यसि शोभनं ॥ ५ ॥

पुत्र उवाच ॥

मामत्तुमिच्छति पुरो मार्ज्जारी किं न पश्यसि ।
अन्तर्द्धानगता चेयं द्वितीया जातहारिणी ॥ ६ ॥
पुत्रप्रीत्या च भवती सहार्द्दा मामवेक्षती ।
उल्लाप्योल्लाप्य बहुशः परिष्वजति मां यतः ॥ ७ ॥
उद्भूतपुलका स्नेहसम्भवास्राविलेक्षणा ।
ततो ममागतो हासः शृणु चाप्यत्र कारणं ॥ ८ ॥
स्वार्थे प्रसक्ता मार्ज्जारी प्रसक्तं मामवेक्षते ।
तथान्तर्द्धानगा चैव द्वितीया जातहारिणी ॥ ९ ॥
स्वार्थाय स्निग्धहृदया यथैवैते ममोपरि ।
प्रवृत्ते स्वार्थमास्थाय तथैव प्रतिभासि मे ॥ १० ॥
किन्तु मदुपभोगाय मार्ज्जारी जातहारिणी ।
त्वन्तु क्रमेणोपभोग्यं मत्तः फलमभीप्ससि ॥ ११ ॥
न मां जानासि कोऽप्येष नचैवोपकृतं मया ।

सङ्गतं नातिकालीनं पञ्चसप्तदिनात्मकं ॥ १२ ॥
तथापि स्निह्यसे सास्रा परिष्वजसि चाप्यति ।
तातेति वत्स भद्रेति निर्व्यलीकं ब्रवीषि मां ॥ १३ ॥

मातोवाच ॥

न त्वाहमुपकारार्थं वत्स प्रीत्या परिष्वजे ।
न चेदेतद्भवत्प्रीत्यै परित्यक्तास्म्यहं त्वया ॥ १४ ॥
स्वार्थो मया परित्यक्तो यस्तत्तो मे भविष्यति ।
इत्युक्त्वा सा तमुत्सृज्य निष्क्रान्ता सूतिकागृहात् ॥ १५ ॥
जडाङ्गवाह्यकरणं शुद्धान्तःकरणात्मकं ।
जहार तं परित्यक्तं सा तदा जातहारिणी ॥ १६ ॥
सा हृत्वा तं तदा बालं विक्रान्तस्य महीभृतः ।
प्रसूतं पत्नीशयने न्यस्य तस्याददे सुतं ॥ १७ ॥
तमप्यन्यगृहे नीत्वा गृहीत्वा तस्य चात्मजं ।
तृतीयं भक्षयामास सा क्रमाज्जातहारिणी ॥ १८ ॥
हृत्वा हृत्वा तृतीयन्तु भक्षयत्यतिनिर्घृणा ।
करोत्यनुदिनं सा तु परिवर्त्तन्तथान्ययोः ॥ १९ ॥
विक्रान्तोऽपि ततस्तस्य सुतस्यैव महीपतिः ।
कारयामास संस्कारान्राजन्यस्य भवन्ति ये ॥ २० ॥
आनन्देति च नामास्य पिता चक्रे विधानतः ।
मुदा परमया युक्तो विक्रान्तः स नराधिपः ॥ २१ ॥
कृतोपनयनं तन्तु गुरुराह कुमारकं ।
जनन्याः प्रागुपस्थानं क्रियताञ्चाभिवादनं ॥ २२ ॥

स गुरोस्तद्वचः श्रुत्वा विहस्यैवमथाब्रवीत् ।
वन्ध्या मे कतमा माता जननी पालनी नु किं ॥ २३ ॥

गुरुरुवाच ॥

न त्वियं ते महाभाग जनयित्री रुथात्मजा ।
विक्रान्तस्याग्रमहिषी हैमिनी नाम नामतः ॥ २४ ॥

आनन्द उवाच ॥

इयं जनित्री चैत्रस्य विशालग्रामवासिनः ।
विप्राग्र्यबोधपुत्रस्य योऽस्यां जातोऽन्यतो वयं ॥ २५ ॥

गुरुरुवाच ॥

कुतस्त्वं कथयानन्द चैत्रः को वा त्वयोच्यते ।
सङ्कटं महदाभाति क्व जातोऽत्र ब्रवीषि किं ॥ २६ ॥

आनन्द उवाच ॥

जातोऽहमवनीन्द्रस्य क्षत्त्रियस्य गृहे द्विज ।
तत्पत्न्यां गिरिभद्रायामादद्दे जातहारिणी ॥ २७ ॥
तयात्र मुक्तो हैमिन्या गृहीत्वा च सुतञ्च सा ।
बोधस्य द्विजमुख्यस्य गृहे नीतवती पुनः ॥ २८ ॥
भक्षयामास च सुतं तस्य बोधद्विजन्मनः ।
स तत्र द्विजसंस्कारैः संस्कृतो हैमिनीसुतः ॥ २९ ॥
वयमत्र महाभाग संस्कृता गुरुणां त्वया ।
मया तत्र वचः कार्य्यमुपैमि कतमां गुरो ॥ ३० ॥

गुरुरुवाच ॥

अतीव गहनं वत्स सङ्कटं महदागतं ।

न वेद्मि किञ्चिन्मोहेन भ्रमन्तीव हि बुद्धयः ॥ ३१ ॥

आनन्द उवाच ॥

मोहस्यावसरः कोऽत्र जगत्येवं व्यवस्थिते ।
कः कस्य पुत्त्रो विप्रर्षे को वा कस्य न बान्धवः ॥ ३२ ॥
आरभ्य जन्मनो नृणां सम्बन्धित्वमुपैति यः ।
अन्ये सम्बन्धिनो विप्र मृत्युना संनिवर्त्तिताः ॥ ३३ ॥
अत्रापि जातस्य सतः सम्बन्धो योऽस्य बान्धवैः ।
सोऽप्यस्तमन्तो देहस्य प्रयात्येषोऽखिलक्रमः ॥ ३४ ॥
अतो ब्रवीमि संसारे वसतः को न बान्धवः ।
को वापि सततं बन्धुः किं वो विभ्राम्यते मतिः ॥ ३५ ॥
पितृद्वयं मया प्राप्तमस्मिन्नेव हि जन्मनि ।
मातृद्वयञ्च किञ्चित्रं यदन्यद्देहसम्भवे ॥ ३६ ॥
सोऽहं तपः करिष्यामि त्वया यो ह्यस्य भूपतेः ।
विशालग्रामतः पुत्त्रश्चैत्र आनीयतामिह ॥ ३७ ॥

मार्कण्डेय उवाच ॥

ततः स विस्मितो राजा सभार्य्यः सह बन्धुभिः ।
तस्मान्निवर्त्य ममतामनुमेने वनाय तं ॥ ३८ ॥
चैत्रमानीय तनयं राज्ययोग्यं चकार सः ।
संमान्य ब्राह्मणं येन पुत्त्रबुद्ध्या स पालितः ॥ ३९ ॥
सोऽप्यानन्दस्तपस्तेपे बाल एव महावने ।
कर्म्मणां क्षपणार्थाय विमुक्तः परिपन्थिनां ॥ ४० ॥
तपस्यन्तं ततस्तञ्च प्राह देवः प्रजापतिः ।

किमर्थं तप्यसे वत्स तपस्तीव्रं वदस्व तत् ॥ ४१ ॥

आनन्द उवाच ॥

आत्मनः शुद्धिकामोऽहं करोमि भगवंस्तपः ।
बन्धाय मम कर्म्माणि यानि तत्क्षपणोन्मुखः ॥ ४२ ॥

ब्रह्मोवाच ॥

क्षीणाधिकारो भवति मुक्तियोग्यो न कर्म्मवान् ।
सत्त्वाधिकारवान् मुक्तिमवाप्स्यति ततो भवान् ॥ ४३ ॥
भवता मनुना भाव्यं षष्ठेन व्रज तत्कुरु ।
अलन्ते तपसा तस्मिन् कृते मुक्तिमवाप्स्यसि ॥ ४४ ॥

मार्कण्डेय उवाच ॥

इत्युक्तो ब्रह्मणा सोऽपि तथेत्युक्त्वा महामतिः ।
तत्कर्म्माभिमुखो यातस्तपसो विरराम ह ॥ ४५ ॥
चाक्षुषेत्याह तं ब्रह्मा तपसो विनिवर्त्तयन् ।
पूर्व्वं नाम्ना बभूवाथ प्रख्यातश्चाक्षुषो मनुः ॥ ४६ ॥
उपयेमे विदर्भां स सुतामुग्रस्य भूभृतः ।
तस्याञ्चोत्पादयामास पुत्रान् प्रख्यातविक्रमान् ॥ ४७ ॥
तस्य मन्वन्तरेशस्य येऽन्तरत्रिदशा द्विज ।
ये चर्षयस्तथैवेन्द्रो ये सुताश्चास्य तान् शृणु ॥ ४८ ॥
आर्य्या नाम सुरास्तत्र तेषामेकोऽष्टको गणः ।
प्रख्यातकर्म्मणां विप्र यज्ञे हव्यभुजामयं ॥ ४९ ॥
प्रख्यातबलवीर्य्याणां प्रभामण्डलदुर्द्दृशां ।
द्वितीयश्च प्रसूताख्यो देवानामष्टको गणः ॥ ५० ॥

तथैवाष्टक एवान्यो भव्याख्यो देवतागणः ।
चतुर्थश्च गणस्तत्र यूथगाख्यस्तथाष्टकः ॥ ५१ ॥
लेखसंज्ञास्तथैवान्ये तत्र मन्वन्तरे द्विज ।
पञ्चमे च गणे देवास्तत्संज्ञा ह्यमृताशिनः ॥ ५२ ॥
शतं क्रतूनामाहृत्य यस्तेषामधिपोऽभवत् ।
मनोजवस्तथैवेन्द्रः संख्यातो यज्ञभागभुक् ॥ ५३ ॥
सुमेधा विरजाश्चैव हविष्मानुन्नतो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥ ५४ ॥
उरूपुरुशतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥ ५५ ॥
एतत्ते कथितं षष्ठं मया मन्वन्तरं द्विज ।
चाक्षुषस्य तथा जन्म चरितञ्च महात्मनः ॥ ५६ ॥
साम्प्रतं वर्त्तते योऽयं नाम्ना वैवस्वतो मनुः ।
सप्तमीयेऽन्तरे तस्य देवाद्यास्तान् शृणुष्व मे ॥ ५७ ॥

इति श्रीमार्कण्डेयपुराणे षष्ठ मन्वन्तरं समाप्तं ॥ ७६ ॥

सप्तसप्ततितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

मार्त्तण्डस्य रवेर्भार्य्या तनया विश्वकर्म्मणः ।
संज्ञा नाम महाभागा तस्यां भानुरजीजनत् ॥ १ ॥

मनुं प्रख्यातयशसमनेकज्ञानपारगं ।
विवस्वतः सुतो यस्मात्तस्माद्वैवस्वतस्तु सः ॥ २ ॥
संज्ञा च रविणा दृष्टा निमीलयति लोचने ।
यतस्ततः सरोषोऽर्कः संज्ञां निष्ठुरमब्रवीत् ॥ ३ ॥
मयि दृष्टे सदा यस्मात् कुरुषे नेत्रसंयमं ।
तस्माज्जनिष्यसे मूढे प्रजासंयमनं यमं ॥ ४ ॥

मार्कण्डेय उवाच ॥

ततः सा चपलां दृष्टिं देवी चक्रे भयाकुला ।
विलोलितदृशं दृष्ट्वा पुनराह च तां रविः ॥ ५ ॥
यस्माद्विलोलिता दृष्टिर्मयि दृष्टे त्वयाधुना ।
तस्माद्विलोलां तनयां नदीं त्वं प्रसविष्यसि ॥ ६ ॥

मार्कण्डेय उवाच ॥

ततस्तस्यान्तु संजज्ञे भर्तृशापेन तेन वै ।
यमश्च यमुना चेयं प्रख्याता सुमहानदी ॥ ७ ॥
सापि संज्ञा रवेस्तेजः सेहे दुःखेन भाविनी ।
असहन्ती च सा तेजश्चिन्तयामास वै तदा ॥ ८ ॥
किङ्करोमि क्व गच्छामि क्व गतायाश्च निर्वृतिः ।
भवेन्मम कथं भर्त्ता कोपमर्कश्च नेष्यति ॥ ९ ॥
इति संचिन्त्य बहुधा प्रजापतिसुता तदा ।
बहु मेने महाभागा पितृसंश्रयमेव सा ॥ १० ॥
ततः पितृगृहे गन्तुं कृतबुद्धिर्यशस्विनी ।
छायामयीमात्मतनुं निर्म्ममे दयितां रवेः ॥ ११ ॥

ताञ्चोवाच त्वया वेश्मन्यत्र भानोर्यथा मया ।
तथा सम्यगपत्येषु वर्त्तितव्यं यथा रवौ ॥ १२ ॥
पृष्टयापि न वाच्यन्ते तथैतद्गमनं मम ।
सैवास्मि नाम संज्ञेति वाच्यमेतत्सदा वचः ॥ १३ ॥

छायासंज्ञोवाच ॥

आकेशग्रहणाद्देवि आशापाच्च वचस्तव ।
करिष्ये कथयिष्यामि वृत्तन्तु शापकर्षणात् ॥ १४ ॥
इत्युक्ता सा तदा देवी जगाम भवनं पितुः ।
ददर्श तत्र त्वष्टारं तपसा धूतकल्मषं ॥ १५ ॥
बहुमानाच्च तेनापि पूजिता विश्वकर्म्मणा ।
तस्थौ पितृगृहे सा तु कञ्चित्कालमनिन्दिता ॥ १६ ॥
ततस्तां प्राह चार्व्वङ्गीं पिता नातिचिरोषितां ।
स्तुत्वा च तनयां प्रेमबहुमानपुरःसरं ॥ १७ ॥
त्वान्तु मे पश्यतो वत्से दिनानि सुबहून्यपि ।
मुहूर्त्तार्द्धसमानि स्युः किन्तु धर्म्मो विलुप्यते ॥ १८ ॥
बान्धवेषु चिरं वासो नारीणां न यशस्करः ।
मनोरथो बान्धवानां नार्य्या भर्तृगृहे स्थितिः ॥ १९ ॥
सा त्वं त्रैलोक्यनाथेन भर्त्रा सूर्य्येण सङ्गता ।
पितृगेहे चिरं कालं वस्तुं नार्हसि पुत्रिके ॥ २० ॥
सा त्वं भर्तृगृहं गच्छ तुष्टोऽहं पूजितासि मे ।
पुनरागमनं कार्य्यं दर्शनाय शुभे मम ॥ २१ ॥

मार्कण्डेय उवाच ॥

इत्युक्ता सा तदा पित्रा तथेत्युक्त्वा च सा मुने ।
संपूजयित्वा पितरं जगामाथोत्तरान् कुरून् ॥ २२ ॥
सूर्य्यतापमनिच्छन्ती तेजसस्तस्य बिभ्यती ।
तपश्चचार तत्रापि वडवारूपधारिणी ॥ २३ ॥
संज्ञेयमिति मन्वानो द्वितीयायामहस्पतिः ।
जनयामास तनयौ कन्याञ्चैकां मनोरमां ॥ २४ ॥
छायासंज्ञा त्वपत्येषु यथा स्वेष्वति वत्सला ।
तथा न संज्ञा कन्यायां पुत्रयोश्चान्ववर्त्तत ॥ २५ ॥
नलिनाद्युपभोगेषु विशेषमनुवासरं ।
मनुस्तत्क्षान्तवानस्या यमस्तस्या न चक्षमे ॥ २६ ॥
ताडनाय च वै कोपात्पादस्तेन समुद्यतः ।
तस्याः पुनः क्षान्तिमता न तु देहे निपातितः ॥ २७ ॥
ततः शशाप तं कोपाच्छायासंज्ञा यमं द्विज ।
किञ्चित्प्रस्फुरमाणोष्ठी विचलत्पाणिपल्लवा ॥ २८ ॥
पितुः पत्नीममर्य्यादं यन्मां तर्ज्जयसे पदा ।
भुवि तस्मादयं पादस्तवाद्यैव पतिष्यति ॥ २९ ॥

मार्कण्डेय उवाच ॥

इत्याकर्ण्य यमः शापं मात्रा दत्तं भयातुरः ।
अभ्येत्य पितरं प्राह प्रणिपातपुरःसरं ॥ ३० ॥

यम उवाच ॥

तातैतन्महदाश्चर्य्यं न दृष्टमिति केनचित् ।

माता वात्सल्यमुत्सृज्य शापं पुत्रे प्रयच्छति ॥ ३१ ॥
यथा मनुर्ममाचष्टे नेयं माता तथा मम ।
विगुणेष्वपि पुत्रेषु न माता विगुणा भवेत् ॥ ३२ ॥

मार्कण्डेय उवाच ॥

यमस्यैतद्वचः श्रुत्वा भगवांस्तिमिरापहः ।
छायासंज्ञां समाहूय पप्रच्छ क्व गतेति सा ॥ ३३ ॥
सा चाह तनया त्वष्टुरहं संज्ञा विभावसो ।
पत्नी तव त्वयापत्यान्येतानि जनितानि मे ॥ ३४ ॥
इत्थं विवस्वतः सा तु बहुशः पृच्छतो यदा ।
नाचचक्षे ततः क्रुद्धो भास्वांस्तां शप्तुमुद्यतः ॥ ३५ ॥
ततः सा कथयामास यथा वृत्तं विवस्वतः ।
विदितार्थश्च भगवान् जगाम त्वष्टुरालयं ॥ ३६ ॥
ततः स पूजयामास तदा त्रैलोक्यपूजितं ।
भास्वन्तं परया भक्त्या निजगेहमुपागतं ॥ ३७ ॥
संज्ञां पृष्टस्तदा तस्मै कथयामास विश्वकृत् ।
आगतैवेह मे वेश्म भवतः प्रेषितेति वै ॥ ३८ ॥
दिवाकरः समाधिस्थो वडवारूपधारिणीं ।
तपश्चरन्तीं दहशे उत्तरेषु कुरुष्वथ ॥ ३९ ॥
सौम्यमूर्त्तिः शुभाकारो मम भर्त्ता भवेदिति ।
अभिसन्धिञ्च तपसो बुबुधेऽस्या दिवाकरः ॥ ४० ॥
शातनं तेजसो मेऽद्य क्रियतामिति भास्करः ।
तञ्चाह विश्वकर्म्माणं संज्ञायाः पितरं द्विज ॥ ४१ ॥

संवत्सरभ्रमेस्तस्य विश्वकर्म्मा रवेस्ततः ।
तेजसः शातनञ्चक्रे स्तूयमानश्च दैवतैः ॥ ४२ ॥

इति श्रीमार्कण्डेयपुराणे वैवस्वत मन्वन्तरे ॥ ७७ ॥

अष्टसप्ततितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

ततस्तं तुष्टुवुर्देवास्तथा देवर्षयो रविं ।
वाग्भिरीड्यमशेषस्य त्रैलोक्यस्य समागताः ॥ १ ॥

देवा ऊचुः ॥

नमस्ते ऋक्स्वरूपाय सामरूपाय ते नमः ।
यजुःस्वरूपरूपाय साम्नान्धामवते नमः ॥ २ ॥
ज्ञानैकधामभूताय निर्धूततमसे नमः ।
शुद्धज्योतिःस्वरूपाय विशुद्धायामलात्मने ॥ ३ ॥
वरिष्ठाय वरेण्याय परस्मै परमात्मने ।
नमोऽखिलजगद्व्यापिस्वरूपायात्ममूर्त्तये ॥ ४ ॥
इदं स्तोत्रवरं रम्यं श्रोतव्यं श्रद्धया नरैः ।
शिष्यो भूत्वा समाधिस्थो दत्वा देयं गुरोरपि ॥ ५ ॥
न शून्यभूतैः श्रोतव्यमेतत्तु सफलं भवेत् ।
सर्व्वकारणभूताय निष्ठायै ज्ञानचेतसां ॥ ६ ॥
नमः सूर्य्यस्वरूपाय प्रकाशात्मस्वरूपिणे ।
भास्कराय नमस्तुभ्यं तथा दिनकृते नमः ॥ ७ ॥

सर्व्वरीहेतवे चैव सन्ध्याज्योत्स्नाकृते नमः ।
त्वं सर्व्वमेतद्भगवान् जगदुद्भ्रमता त्वया ॥ ८ ॥
भ्रमत्याविद्धमखिलं ब्रह्माण्डं सचराचरं ।
त्वदंशुभिरिदं स्पृष्टं सर्व्वं सञ्जायते शुचि ॥ ९ ॥
क्रियते त्वत्करैःस्पर्शाज्जलादीनां पवित्रता ।
होमदानादिको धर्म्मो नोपकाराय जायते ॥ १० ॥
तावद्यावन्न संयोगि जगदेतत्त्वदंशुभिः ।
ऋचस्ते सकला ह्येता यजूंष्येतानि चान्यतः ॥ ११ ॥
सकलानि च सामानि निपतन्ति त्वदङ्गतः ।
ऋङ्मयस्त्वं जगन्नाथ त्वमेव च यजुर्म्मयः ॥ १२ ॥
यतः साममयश्चैव ततो नाथ त्रयीमय ।
त्वमेव ब्रह्मणो रूपं परञ्चापरमेव च ॥ १३ ॥
मूर्त्तामूर्त्तस्तथा सूक्ष्मः स्थूलरूपस्तथा स्थितः ।
निमेषकाष्ठादिमयः कालरूपः क्षयात्मकः ॥
प्रसीद स्वेच्छया रूपं स्वतेजःशमनं कुरु ॥ १४ ॥

मार्कण्डेय उवाच ॥

एवं संस्तूयमानस्तु देवैर्देवर्षिभिस्तथा ।
मुमोच स्वं तदा तेजस्तेजसां राशिरव्ययः ॥ १५ ॥
यत्तस्य ऋङ्मयं तेजो भविता तेन मेदिनी ।
यजुर्म्मयेनापि दिवं स्वर्गः साममयं रवेः ॥ १६ ॥
शातितास्तेजसो भागा ये त्वष्ट्रा दश पञ्च च ।
त्वष्ट्रैव तेन सर्व्वस्य कृतं शूलं महात्मना ॥ १७ ॥

चक्रं विष्णोर्वसूनाञ्च शङ्करस्य सुदारुणम् ।
पावकस्य तथा शक्तिः शिविका धनदस्य च ॥ १८ ॥
अन्येषाञ्च सुरारीणामस्त्राण्युग्राणि यानि वै ।
यक्षविद्याधराणाञ्च तानि चक्रे स विश्वकृत् ॥ १९ ॥
ततश्च षोडशं भागं बिभर्त्ति भगवान् विभुः ।
तत्तेजः पञ्चदशधा शातितं विश्वकर्म्मणा ॥ २० ॥
ततोऽश्वरूपधृग्भानुरुत्तरानगमत्कुरून् ।
ददृशे तत्र संज्ञाञ्च वडवारूपधारिणीं ॥ २१ ॥
सा च दृष्ट्वा तमायान्तं परपुंसो विशङ्कया ।
जगाम संमुखं तस्य पृष्ठरक्षणतत्परा ॥ २२ ॥
ततश्च नासिकायोगं तयोस्तत्र समेतयोः ।
नासत्यदस्रौ तनयावश्ववक्त्रविनिर्गतौ ॥ २३ ॥
रेतसोऽन्ते च रेवन्तः खड्गी चर्म्मी तनुत्रधृक् ।
अश्वारूढः समुद्भूतो वाणतूणसमन्वितः ॥ २४ ॥
ततः स्वरूपमतुलं दर्शयामास भानुमान् ।
तस्यैषा च समालोक्य स्वरूपं मुदमाददे ॥ २५ ॥
स्वरूपधारिणीञ्चेमामानिनाय निजाश्रयं ।
संज्ञां भार्य्यां प्रीतिमतीं भास्करो वारितस्करः ॥ २६ ॥
ततः पूर्व्वसुतो योऽस्याः सोऽभूद्वैवस्वतो मनुः ।
द्वितीयश्च यमः शापाद्धर्म्मदृष्टिरभूत्सुतः ॥ २७ ॥
तृतीयो मां समादाय पादतोऽस्य महीतले ।
पतिष्यतीति शापान्तं तस्य चक्रे पिता स्वयं ॥ २८ ॥

धर्म्मदृष्टिर्यतश्चासौ समो मित्रे तथाऽहिते ।
ततो नियोगं तं याम्ये चकार तिमिरापहः ॥ २९ ॥
यमुना च नदी जज्ञे कलिन्दान्तरवाहिनी ।
अश्विनौ देवभिषजौ कृतौ पित्रा महात्मना ॥ ३० ॥
गुह्यकाधिपतित्वे च रेवन्तोऽपि नियोजितः ।
छायासंज्ञासुतानाञ्च नियोगः श्रूयतां मम ॥ ३१ ॥
पूर्व्वजस्य मनोस्तुल्यश्छायासंज्ञासुतोऽग्रजः ।
ततः सावर्णिकीं संज्ञामवाप तनयो रवेः ॥ ३२ ॥
भविष्यति मनुः सोऽपि बलिरिन्द्रो यदा तदा ।
शनैश्चरो ग्रहाणाञ्च मध्ये पित्रा नियोजितः ॥ ३३ ॥
तयोस्तृतीया या कन्या तपती नाम सा कुरुं ।
नृपात्संवरणात्पुत्रमवाप मनुजेश्वरं ॥ ३४ ॥
तस्य वैवस्वतस्याहं मनोः सप्तममन्तरं ।
कथयामि सुतान् भूपान्नृषीन् देवान् सुराधिपं ॥ ३५ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे वैवस्वतोत्पत्तिर्नाम ॥ ७८ ॥

ऊनाशीतितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

आदित्या वसवो रुद्राः साध्या विश्वे मरुद्गणाः ।
भृगवोऽङ्गिरसश्चाष्टौ यत्र देवगणाः स्मृताः ॥ १ ॥

आदित्या वसवो रुद्रा विज्ञेयाः कश्यपात्मजाः ।
साध्याश्च वसवो विश्वे धर्म्मपुत्त्रगणास्त्रयः ॥ २ ॥
भृगोस्तु भृगवो देवाः पुत्त्रा ह्यङ्गिरसः सुताः ।
एष सर्गश्च मारीचो विज्ञेयः साम्प्रताधिपः ॥ ३ ॥
ऊर्ज्जस्वी नाम चैवेन्द्रो महात्मा यज्ञभागभुक् ।
अतीता नागता ये च वर्त्तन्ते साम्प्रतञ्च ये ॥ ४ ॥
सर्व्वे ते त्रिदशेन्द्रास्तु विज्ञेयास्तुल्यलक्षणाः ।
सहस्राक्षाः कुलिशिनः सर्व्व एव पुरन्दराः ॥ ५ ॥
मघवन्तो वृषाः सर्व्वे शृङ्गिनो गजगामिनः ।
ते शतक्रतवः सर्व्वे भूताभिभवतेजसः ॥ ६ ॥
धर्म्माद्यैः कारणैः शुद्धैराधिपत्यगुणान्विताः ।
भूतभव्यभवन्नाथाः शृणु चैतत्त्रयं द्विज ॥ ७ ॥
भूर्लोकोऽयं स्मृता भूमिरन्तरीक्षं दिवः स्मृतं ।
दिव्याख्यश्च तथा स्वर्गस्त्रैलोक्यमिति गद्यते ॥ ८ ॥
अत्रिश्चैव वशिष्ठश्च काश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ॥ ९ ॥
तथैव पुत्त्रो भगवानृचीकस्य महात्मनः ।
जमदग्निस्तु सप्तैते मुनयोऽत्र तथान्तरे ॥ १० ॥
इक्ष्वाकुर्नाभगश्चैव धृष्टशर्म्मातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभगो दिष्ट एव च ॥ ११ ॥
करूपश्च पृषध्रश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्त्राः प्रकीर्त्तिताः ॥ १२ ॥

वैवस्वतमिदं ब्रह्मन् कथितन्ते मयान्तरं ।
अस्मिन् श्रुते नरः सद्यः पठिते चैव सत्तम ॥
मुच्यते पातकैः सर्व्वैः पुण्यञ्च महदश्नुते ॥ १३ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे वैवस्वतकीर्त्तनं ॥ ७९ ॥

## अशीतितमोऽध्यायः ॥

क्रोष्टुकिरुवाच ॥

स्वायम्भुवाद्याः कथिताः सप्तैते मनवो मया ।
तदन्तरेषु ये देवा राजानो मुनयस्तथा ॥ १ ॥
अस्मिन् कल्पे सप्त येऽन्ये भविष्यन्ति महामुने ।
मनवस्तान् समाचक्ष्व ये च देवादयश्च ये ॥ २ ॥

मार्कण्डेय उवाच ॥

कथितस्तव सावर्णिश्छायासंज्ञासुतश्च यः ।
पूर्व्वजस्य मनोस्तुल्यः स मनुर्भविताष्टमः ॥ ३ ॥
रामो व्यासो गालवश्च दीप्तिमान् कृप एव च ।
ऋष्यशृङ्गस्तथा द्रौणिस्तत्र सप्तर्षयोऽभवन् ॥ ४ ॥
सुतपाश्चामिताभाश्च मुख्याश्चैव त्रिधा सुराः ।
विंशकः कथिताश्चैषां त्रयाणां त्रिगुणो गणः ॥ ५ ॥
तपस्तपश्च शक्रश्च द्युतिर्ज्योतिः प्रभाकरः ।
प्रभासो दयितो धर्म्मस्तेजोरश्मिश्च वक्रतुः ॥ ६ ॥

इत्यादिकस्तु सुतपा देवानां विंशको गणः ।
प्रभुर्विभुर्विभासाद्यस्तथान्यो विंशको गणः ॥ ७ ॥
सुराणाममितानान्तु तृतीयमपि मे शृणु ।
दमो दान्तो ऋतः सोमो वित्ताद्याश्चैव विंशतिः ॥ ८ ॥
मुख्या ह्येते समाख्याता देवा मन्वन्तराधिपाः ।
मारीचस्यैव ते पुत्राः काश्यपस्य प्रजापतेः ॥ ९ ॥
भविष्याश्च भविष्यन्ति सावर्णस्यान्तरे मनोः ।
तेषामिन्द्रो भविष्यस्तु बलिर्वैरोचनिर्मुने ॥ १० ॥
पाताल आस्ते योऽद्यापि दैत्यः समयबन्धनः ।
विरजाश्चार्व्ववीरश्च निर्मोहः सत्यवाक् कृतिः ॥
विष्णवाद्याश्चैव तनयाः सावर्णस्य मनोर्नृपाः ॥ ११ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णके ॥ ८० ॥

एकाशीतितमोऽध्यायः ॥

# देवीमाहात्म्यारम्भः ॥

ओं नमश्चण्डिकायै ॥

मार्कण्डेय उवाच ॥

सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ १ ॥
महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥ २ ॥
स्वारोचिषेऽन्तरे पूर्व्वं चैत्रवंशसमुद्भवः ।
सुरथो नाम राजाऽभूत्समस्ते क्षितिमण्डले ॥ ३ ॥
तस्य पालयतः सम्यक् प्रजाः पुत्त्रानिवौरसान् ।
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तथा ॥ ४ ॥
तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः ।
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्ज्जितः ॥ ५ ॥
ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ।
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥ ६ ॥
आमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ।
कोषो बलञ्चापहृतं तत्रापि स्वपुरे ततः ॥ ७ ॥
ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ।
एकाकी हयमारुह्य जगाम गहनं वनं ॥ ८ ॥

स तत्राश्रममद्राक्षीद्द्विजवर्य्यस्य मेधसः ।
प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितं ॥ ९ ॥
तस्थौ कञ्चित्स कालञ्च मुनिना तेन सत्कृतः ।
इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे ॥ १० ॥
सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचेतनः ।
मत्पूर्व्वैः पालितं पूर्व्वं मया हीनं पुरं हि तत् ॥
मद्भृत्यैस्तैरसद्वृत्तैर्धर्म्मतः पाल्यते न वा ॥ ११ ॥
न जाने स प्रधानो मे शूरहस्ती सदामदः ।
मम वैरिवशं यातः कान् भोगानुपलप्स्यते ॥ १२ ॥
ये ममानुगता नित्यं प्रसादधनभोजनैः ।
अनुवृत्तिं ध्रुवं तेऽद्य कुर्व्वन्त्यन्यमहीभृतां ॥ १३ ॥
असम्यग्व्ययशीलैस्तैः कुर्व्वद्भिः सततं व्ययं ।
सञ्चितः सोऽतिदुःखेन क्षयं कोषो गमिष्यति ॥ १४ ॥
एतच्चान्यच्च सततं चिन्तयामास पार्थिवः ।
तत्र विप्राश्रमाभ्यासे वैश्यमेकं ददर्श सः ॥ १५ ॥
स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ।
सशोक इव कस्मात्त्वं दुर्म्मना इव लक्ष्यसे ॥ १६ ॥
इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितं ।
प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपं ॥ १७ ॥
समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ।
पुत्त्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥ १८ ॥
विहीनश्च धनैर्दारैः पुत्त्रैरादाय मे धनं ।

वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः । १९ ॥
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकां ।
प्रवृत्तिं स्वजनानाञ्च दाराणाञ्चात्र संस्थितः ॥ २० ॥
किन्नु तेषां गृहे क्षेममक्षेमं किन्नु साम्प्रतं ।
कथन्ते किन्नु सद्वृत्ता दुर्वृत्ताः किन्नु मे सुताः ॥ २१ ॥

राजोवाच ॥

यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ।
तेषु किं भवतः स्नेहमनुबध्नाति मानसं ॥ २२ ॥

वैश्य उवाच ॥

एवमेतद्यथा प्राह भवानस्मद्गतं वचः ।
किं करोमि न बध्नाति मम निष्ठुरतां मनः ॥ २३ ॥
यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ।
पतिस्वजनहार्दञ्च हार्दि तेष्वेव मे मनः ॥ २४ ॥
किमेतन्नाभिजानामि जानन्नपि महामते ।
यत्प्रेमप्रवणञ्चित्तं विगुणेष्वपि बन्धुषु ॥ २५ ॥
तेषां कृते मे निःश्वासो दौर्मनस्यञ्च जायते ।
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरं ॥ २६ ॥

मार्कण्डेय उवाच ॥

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ।
समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ॥ २७ ॥
कृत्वा तु तौ यथान्यायं यथार्हन्तेन संविदं ।
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥ २८ ॥

राजोवाच ॥

भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ।
दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ॥ २९ ॥
ममत्वं मम राज्यस्य राज्याङ्गेष्वखिलेष्वपि ।
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ॥ ३० ॥
अयञ्च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ।
स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ॥ ३१ ॥
एवमेष तथाहञ्च द्वावप्यत्यन्तदुःखितौ ।
दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ॥ ३२ ॥
तत्केनैतन्महाभाग यन्मोहो ज्ञानिनोरपि ।
ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥ ३३ ॥

ऋषिरुवाच ॥

ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ।
विषयश्च महाभाग याति चैवं पृथक् पृथक् ॥ ३४ ॥
दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे ।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥ ३५ ॥
ज्ञानिनो मनुजाः सत्यं किन्तु ते न हि केवलं ।
यतो हि ज्ञानिनः सर्व्वे पशुपक्षिमृगादयः ॥ ३६ ॥
ज्ञानञ्च तन्मनुष्याणां यत्तेषां मृगपक्षिणां ।
मनुष्याणाञ्च यत्तेषां तुल्यमन्यत्तथोभयोः ॥ ३७ ॥
ज्ञानेऽपि सति पश्यैतान् पतगाञ्छावचञ्चुषु ।
कणमोक्षादृतान्मोहात् पीड्यमानानपि क्षुधा ॥ ३८ ॥

मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति ।
लोभात्प्रत्युपकाराय नन्वेते किं न पश्यसि ॥ ३९ ॥
तथापि ममतावर्त्ते मोहगर्त्ते निपातिताः ।
महामायाप्रभावेन संसारस्थितिकारिणः ॥ ४० ॥
तन्नात्र विस्मयः कार्य्यो योगनिद्रा जगत्पतेः ।
महामाया हरेश्चैतत्तया संमोह्यते जगत् ॥ ४१ ॥
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥ ४२ ॥
तया विसृज्यते विश्वं जगदेतच्चराचरं ।
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥ ४३ ॥
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ।
संसारबन्धहेतुश्च सैव सर्व्वेश्वरेश्वरी ॥ ४४ ॥

राजोवाच ॥

भगवन् का हि सा देवी महामायेति यां भवान् ।
ब्रवीति कथमुत्पन्ना सा कर्म्मास्याश्च किं द्विज ॥ ४५ ॥
यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ।
तत्सर्व्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ ४६ ॥

ऋषिरुवाच ॥

नित्यैव सा जगन्मूर्त्तिस्तया सर्व्वमिदं ततं ।
तथापि तत्समुत्पत्तिर्ब्बहुधा श्रूयतां मम ॥ ४७ ॥
देवानां कार्य्यसिद्ध्यर्थमाविर्भवति सा यदा ।
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ॥ ४८ ॥

योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् प्रभुः ॥ ४९ ॥
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥ ५० ॥
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ।
दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तञ्च जनार्द्दनं ॥ ५१ ॥
तुष्टाव योगनिद्रान्तामेकाग्रहृदयस्थितः ।
विबोधनार्थाय हरेर्हरिनेत्रकृतालयां ॥ ५२ ॥
विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीं ।
निद्रां भगवतीं विष्णोरतुलान्तेजसः प्रभुः ॥ ५३ ॥

ब्रह्मोवाच ॥

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।
सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥ ५४ ॥
अर्द्धमात्रा स्थिता नित्या यानुच्चार्य्याविशेषतः ।
त्वमेव सा त्वं सावित्री त्वं देवी जननी परा ॥ ५५ ॥
त्वयैव धार्य्यते सर्व्वं त्वयैतत्सृज्यते जगत् ।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्व्वदा ॥ ५६ ॥
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥ ५७ ॥
महाविद्या महामाया महामेधा महास्मृतिः ।
महामोहा च भवती महादेवी महासुरी ॥ ५८ ॥
प्रकृतिस्त्वञ्च सर्व्वस्य गुणत्रयविभाविनी ।

कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥ ५९ ॥
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥ ६० ॥
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुसुण्डीपरिघायुधा ॥ ६१ ॥
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ।
परापराणां परमा त्वमेव परमेश्वरी ॥ ६२ ॥
यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ॥ ६३ ॥
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ ६४ ॥
विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥ ६५ ॥
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ ६६ ॥
प्रबोधञ्च जगत्स्वामी नीयतामच्युतो लघु ।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥ ६७ ॥

ऋषिरुवाच ॥

एवं स्तुता तदा देवी तामसी तत्र वेधसा ।
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ॥ ६८ ॥
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥ ६९ ॥

उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्द्दनः ।
एकार्णवे हि शयनात्ततः स ददृशे च तौ ॥ ७० ॥
मधुकैटभौ दुरात्मानावतिवीर्य्यपराक्रमौ ।
क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ॥ ७१ ॥
समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ।
पञ्च वर्षसहस्राणि बाहुप्रहरणो विभुः ॥ ७२ ॥
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवं ॥ ७३ ॥

भगवानुवाच ॥

भवेतामद्य मे तुष्टौ मम बध्यावुभावपि ।
किमन्येन वरेणात्र एतावद्धि वृतं मम ॥ ७४ ॥

ऋषिरुवाच ॥

वञ्चिताभ्यामिति तदा सर्व्वमापोमयं जगत् ।
विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः ॥
आवां जहि न यत्रोर्व्वी सलिलेन परिप्लुता ॥ ७५ ॥

ऋषिरुवाच ॥

तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता ।
कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ॥ ७६ ॥
एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयं ।
प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ॥ ७७ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये मधुकैटभबधः ॥ ८१ ॥

## द्व्यशीतितमोऽध्यायः ॥

ऋषिरुवाच ॥

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ।
महिषेऽसुराणामधिपे देवानाञ्च पुरन्दरे ॥ १ ॥
तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितं ।
जित्वा च सकलान्देवानिन्द्रोऽभून्महिषासुरः ॥ २ ॥
ततः पराजिता देवाः पद्मयोनिं प्रजापतिं ।
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥ ३ ॥
यथा वृत्तान्तयोस्तद्वन्महिषासुरचेष्टितं ।
त्रिदशाः कथयामासुर्देवाभिभवविस्तरं ॥ ४ ॥
सूर्य्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च ।
अन्येषाञ्चाधिकारान् स स्वयमेवाधितिष्ठति ॥ ५ ॥
स्वर्गान्निराकृताः सर्व्वे तेन देवगणा भुवि ।
विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥ ६ ॥
एतद्वः कथितं सर्व्वममरारिविचेष्टितं ।
शरणञ्च प्रपन्नाःस्मो बधस्तस्य विचिन्त्यतां ॥ ७ ॥
इत्थं निशम्य देवानां वचांसि मधुसूदनः ।
चकार कोपं शम्भुश्च भ्रुकुटिकुटीलाननौ ॥ ८ ॥
ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ।
निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ॥ ९ ॥

अन्येषाञ्चैव देवानां शक्रादीनां शरीरतः।
निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥ १० ॥
अतीव तेजसः कूटं ज्वलन्तमिव पर्व्वतं।
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरं ॥ ११ ॥
अतुलन्तत्र तत्तेजः सर्व्वदेवशरीरजं।
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥ १२ ॥
यदभूच्छाम्भवन्तेजस्तेनाजायत तन्मुखं।
याम्येन चाभवन् केशा बाहवो विष्णुतेजसा ॥ १३ ॥
सौम्येन स्तनयोर्युग्मं मध्यञ्चैन्द्रेण चाभवत्।
वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः ॥ १४ ॥
ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा।
वसूनाञ्च कराङ्गुल्यः कौवेरेण च नासिका ॥ १५ ॥
तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन तेजसा।
नयनत्रितयं जज्ञे तथा पावकतेजसा ॥ १६ ॥
भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च।
अन्येषाञ्चैव देवानां सम्भवस्तेजसां शिवा ॥ १७ ॥
ततः समस्तदेवानां तेजोराशिसमुद्भवां।
तां विलोक्य मुदं प्रापुरमरा महिषार्द्दिताः ॥ १८ ॥
शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक्।
चक्रञ्च दत्तवान् कृष्णः समुत्पाद्य स्वचक्रतः ॥ १९ ॥
शङ्खञ्च वरुणः शक्तिं ददौ तस्यै हुताशनः।
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥ २० ॥

वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः ।
ददौ तस्यै सहस्राक्षो घण्टामैरावताद्गजात् ॥ २१ ॥
कालदण्डाद्यमो दण्डं पाशञ्चाम्बुपतिर्ददौ ।
प्रजापतिश्चाक्षमालान्ददौ ब्रह्मा कमण्डलुं ॥ २२ ॥
समस्तरोमकूपेषु निजरश्मीन्दिवाकरः ।
कालश्च दत्तवान् खड्गं तस्याश्चर्म्म च निर्मलं ॥ २३ ॥
क्षीरोदश्चामलं हारमजरे च तथाम्बरे ।
चूडामणिन्तथा दिव्यं कुण्डले कटकानि च ॥ २४ ॥
अर्द्धचन्द्रं तथा शुभ्रं केयूरान् सर्व्वबाहुषु ।
नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमं ॥ २५ ॥
अङ्गुरीयकरत्नानि समस्तास्वङ्गुलीषु च ।
विश्वकर्म्मा ददौ तस्यै परशुञ्चातिनिर्म्मलं ॥ २६ ॥
अस्त्राण्यनेकरूपाणि तथाभेद्यञ्च दंशनं ।
अम्लानपङ्कजां मालां शिरस्युरसि चापरां ॥ २७ ॥
अददज्जलधिस्तस्यै पङ्कजञ्चातिशोभनं ।
हिमवान् वाहनं सिंहं रत्नानि विविधानि च ॥ २८ ॥
ददावशून्यं सुरया पानपात्रं धनाधिपः ।
शेषश्च सर्व्वनागेशो महामणिविभूषितं ॥ २९ ॥
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमां ।
अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥ ३० ॥
सम्मानिता ननादोच्चैः साट्टहासं मुहुर्म्मुहुः ।
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥ ३१ ॥

अमायतातिमहता प्रतिशब्दो महानभूत् ।
चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ॥ ३२ ॥
चचाल वसुधा चेलुः सकलाश्च महीधराः ।
जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीं ॥ ३३ ॥
तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्त्तयः ।
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥ ३४ ॥
सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ।
आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥ ३५ ॥
अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ।
स ददर्श ततो देवीं व्याप्तलोकत्रयं त्विषा ॥ ३६ ॥
पादाक्रान्त्यानतभुवं किरीटोल्लिखिताम्बरां ।
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन तां ॥ ३७ ॥
दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थितां ।
ततः प्रववृते युद्धं तया देव्या सुरद्विषां ॥ ३८ ॥
शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरं ।
महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ ३९ ॥
युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ।
रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥ ४० ॥
अयुध्यतायुतानाञ्च सहस्रेण महाहनुः ।
पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ॥ ४१ ॥
अयुतानां शतैः षड्भिर्व्वास्कलो युयुधे रणे ।
गजवाजिसहस्रौघैरनेकैः परिवारितः ॥ ४२ ॥

वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ।
बिडालाख्योऽयुतानाञ्च पञ्चाशद्भिरथायुतैः ॥ ४३ ॥
युयुधे संयुगे तत्र रथानां परिवारितः ।
अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥ ४४ ॥
युयुधुः संयुगे देव्या सह तत्र महासुराः ।
कोटिकोटिसहस्रैस्तु रथानां दन्तिनान्तथा ॥ ४५ ॥
हयानाञ्च वृतो युद्धे तत्राभून्महिषासुरः ।
तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुषलैस्तथा ॥ ४६ ॥
युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ।
केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥ ४७ ॥
देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ।
सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥ ४८ ॥
लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ।
अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ॥ ४९ ॥
मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ।
सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेशरी ॥ ५० ॥
चचारासुरसैन्येषु वनेष्विव हुताशनः ।
निश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥ ५१ ॥
त एव सद्यः सम्भूता गणाः शतसहस्रशः ।
युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ॥ ५२ ॥
नाशयन्तोऽसुरगणान्देवीशक्त्युपबृंहिताः ।
अवादयन्त पटहान् गणाः शङ्खांस्तथापरे ॥ ५३ ॥

मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे ।
ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ॥ ५४ ॥
खड्गादिभिश्च शतशो निजघान महासुरान् ।
पातयामास चैवान्यान् घण्टास्वनविमोहितान् ॥ ५५ ॥
असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षत ।
केचिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥ ५६ ॥
विपोथिता निपातेन गदया भुवि शेरते ।
वेमुश्च केचिद्रुधिरं मुषलेन भृशं हताः ॥ ५७ ॥
केचिन्निपातिता भूमौ भिन्नाः शूलेन वक्षसि ।
निरन्तराः शरौघेन कृताः केचिद्रणाजिरे ॥ ५८ ॥
सेनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्द्दनाः ।
केषाञ्चिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥ ५९ ॥
शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ।
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्व्यां महासुराः ॥ ६० ॥
एकबाह्वक्षिचरणाः केचिद्देव्या द्विधाकृताः ।
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥ ६१ ॥
कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ।
ननृतुश्चापरे तत्र युद्धे तूर्य्यलयाश्रिताः ॥ ६२ ॥
कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ।
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ॥ ६३ ॥
पातितै रथनागाश्वैरसुरैश्च वसुन्धरा ।
अगम्या साऽभवत्तत्र यत्राभूत्स महारणः ॥ ६४ ॥

शोणितौघा महानद्यः सद्यस्तत्र विसुस्रुवुः ।
मध्ये चासुरसैन्यस्य वारणासुरवाजिनां ॥ ६५ ॥
क्षणेन तन्महासैन्यमसुराणान्तथाम्बिका ।
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयं ॥ ६६ ॥
स च सिंहो महानादमुत्सृजन् धुतकेशरः ।
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥ ६७ ॥
देव्या गणैश्च तैस्तत्र कृतं युद्धं तथाऽसुरैः ।
यथैषान्तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥ ६८ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरसैन्यवधः ॥ ८२ ॥

---

अशीतितमोऽध्यायः ॥

ऋषिरुवाच ॥

निहन्यमानं तत्सैन्यमवलोक्य महासुरः ।
सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकां ॥ १ ॥
स देवीं शरवर्षेण ववर्ष समरेऽसुरः ।
यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः ॥ २ ॥
तस्य छित्त्वा ततो देवी लीलयैव शरोत्करान् ।
जघान तुरगान् वाणैर्यन्तारञ्चैव वाजिनां ॥ ३ ॥
चिच्छेद च धनुः सद्यो ध्वजञ्चातिसमुच्छ्रितं ।
विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥ ४ ॥

स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
अभ्यधावत तां देवीं खड्गचर्म्मधरोऽसुरः ॥ ५ ॥
सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्द्धनि ।
आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥ ६ ॥
तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ।
ततो जग्राह शूलं स कोपादरुणलोचनः ॥ ७ ॥
चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ।
जाज्वल्यमानन्तेजोभीरविविम्बमिवाम्बरात् ॥ ८ ॥
दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ।
तच्छूलं शतधा तेन नीतं स च महासुरः ॥ ९ ॥
हते तस्मिन्महावीर्य्ये महिषस्य चमूपतौ ।
आजगाम गजारूढश्चामरस्त्रिदशार्द्दनः ॥ १० ॥
सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतं ।
हुंकाराभिहतां भूमौ पातयामास निष्प्रभां ॥ ११ ॥
भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ।
चिक्षेप चामरः शूलं वाणैस्तदपि साच्छिनत् ॥ १२ ॥
ततः सिंहः समुत्पत्य गजकुम्भान्तरस्थितः ।
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ १३ ॥
युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ।
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥ १४ ॥
ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा ।
करप्रहारेण शिरश्चामरस्य पृथक् कृतं ॥ १५ ॥

उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ।
दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥ १६ ॥
देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतं ।
वास्कलं भिन्दिपालेन वाणैस्ताम्रं तथान्धकं ॥ १७ ॥
उग्रास्यमुग्रवीर्य्यञ्च तथैव च महाहनुं ।
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥ १८ ॥
विडालस्यासिना कायात् पातयामास वै शिरः ।
दुर्द्धरं दुर्म्मुखञ्चोभौ शरैर्निन्ये यमक्षयं ॥ १९ ॥
एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ।
माहिषेण स्वरूपेण त्रासयामास तान् गणान् ॥ २० ॥
कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् ।
लाङ्गूलताडितांश्चान्यान् शृङ्गाभ्याञ्च विदारितान् ॥ २१ ॥
वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ।
निश्वासपवनेनान्यान् पातयामास भूतले ॥ २२ ॥
निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ।
सिंहं हन्तुं महादेव्याः कोपञ्चक्रे ततोऽम्बिका ॥ २३ ॥
सोऽपि कोपान्महावीर्य्यः खुरक्षुण्णमहीतलः ।
शृङ्गाभ्यां पर्व्वतानुच्चांश्चिक्षेप च ननाद च ॥ २४ ॥
वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्य्यत ।
लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्व्वतः ॥ २५ ॥
धुतशृङ्गविभिन्नाश्च खण्डखण्डं ययुर्घनाः ।
श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥ २६ ॥

इति क्रोधसमाध्मातमापतन्तं महासुरं ।
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ॥ २७ ॥
सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरं ।
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥ २८ ॥
ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ।
छिनत्ति तावत् पुरुषः खड्गपाणिरदृश्यत ॥ २९ ॥
तत एवाशु पुरुषं देवी चिच्छेद शायकैः ।
तं खड्गचर्म्मणा सार्द्धं ततः सोऽभून्महागजः ॥ ३० ॥
करेण च महासिंहं तञ्चकर्ष जगर्ज्ज च ।
कर्षतस्तु करन्देवी खड्गेन निरकृन्तत ॥ ३१ ॥
ततो महासुरो भूयो माहिषं वपुरास्थितः ।
तथैव क्षोभयामास त्रैलोक्यं सचराचरं ॥ ३२ ॥
ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमं ।
पपौ पुनः पुनश्चैव जहासारुणलोचना ॥ ३३ ॥
ननर्द्द चासुरः सोऽपि बलवीर्य्यमदोद्धतः ।
विषाणाभ्याञ्च चिक्षेप चण्डिकां प्रति भूधरान् ॥ ३४ ॥
सा च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ।
उवाच तं मदोद्धूतमुखरागाकुलाक्षरं ॥ ३५ ॥

देव्युवाच ॥

गर्ज्ज गर्ज्ज क्षणं मूढ मधु यावत् पिवाम्यहं ।
मया त्वयि हतेऽत्रैव गर्ज्जिष्यन्त्याशु देवताः ॥ ३६ ॥
एवमुक्त्वा समुत्पत्य सारूढा तं महासुरं ।

पादेनाक्रम्य कण्ठे च शूलेनैनमताड़यत् ॥ ३७ ॥
ततः सोऽपि पदाक्रान्तस्तया निजमुखात्ततः ।
अर्द्धनिष्क्रान्त एवाति देव्या वीर्य्येण संवृतः ॥ ३८ ॥
अर्द्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ।
तया महासिना देव्या शिरश्छित्त्वा निपातितः ॥ ३९ ॥
ततो हाहाकृतं सर्व्वं दैत्यसैन्यं ननाश तत् ।
प्रहर्षञ्च परं जग्मुः सकला देवतागणाः ॥ ४० ॥
तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्म्महर्षिभिः ।
जगुर्गन्धर्व्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४१ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
महिषासुरवधः ॥ ८३ ॥

---

चतुरशीतितमोऽध्यायः ।

ऋषिरुवाच ।

शक्रादयः सुरगणा निहतेऽतिवीर्य्ये
तस्मिन् दुरात्मनि सुरारिबले च देव्या ।
तां तुष्टुवुः प्रणतिनम्रशिरोऽधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ १ ॥
देव्या यया ततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्त्या ।

तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥ २ ॥
यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलञ्च ।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥ ३ ॥
या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वं ॥ ४ ॥
किं वर्णयाम तव रूपमचिन्त्यमेतत्
किञ्चातिवीर्य्यमसुरक्षयकारि भूरि ।
किञ्चाहवेषु चरितानि तवाति यानि
सर्व्वेषु देव्यसुरदेवगणादिकेषु ॥ ५ ॥
हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्व्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ६ ॥
यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि ।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्य्यसे त्वमत एव जनैः स्वधा च ॥ ७ ॥

या मुक्तिहेतुरविचिन्त्यमहाव्रता च
अभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्व्विद्यासि सा भगवती परमा हि देवि ॥ ८ ॥
शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीतरम्यपदपाठवताञ्च साम्नां ।
देवी त्रयी भगवती भवभावनाय
वार्त्ता च सर्व्वजगतां परमार्त्तिहन्त्री ॥ ९ ॥
मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ १० ॥
ईषत्सहासममलं परिपूर्णचन्द्र-
विम्बानुकारि कनकोत्तमकान्ति कान्तं ।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥ ११ ॥
दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।
प्राणान्मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥ १२ ॥
देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ।

विज्ञातमेतदधुनैव यदस्तमेतन्नीतं
बलं सुविपुलं महिषासुरस्य ॥ १३ ॥
ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि नच सीदति धर्म्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥ १४ ॥
धर्म्याणि देवि सकलानि सदैव कर्म्मा-
ण्यत्यादृतः प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवतीप्रासादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥ १५ ॥
दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभान्ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्व्वोपकारकरणाय सदार्द्रचित्ता ॥ १६ ॥
एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्व्वन्तु नाम नरकाय चिराय पापं ।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ॥ १७ ॥
दृष्ट्वैव किन्न भवती प्रकरोति भस्म
सर्व्वासुरानरिषु यत् प्रहिणोषि शस्त्रम् ।
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥ १८ ॥

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणां ।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥ १९ ॥
दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्य्यञ्च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थं ॥ २० ॥
केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपञ्च शत्रुभयकार्य्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ २१ ॥
त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवन्नमस्ते ॥ २२ ॥
शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिस्वनेन च ॥ २३ ॥
प्राच्यां रक्ष प्रतीच्याञ्च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यान्तथेश्वरि ॥ २४ ॥
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवं ॥ २५ ॥

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्व्वतः ॥ २६ ॥

ऋषिरुवाच ॥

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ।
अर्च्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥ २७ ॥
भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता ।
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥ २८ ॥

देव्युवाच ॥

व्रियतां त्रिदशाः सर्व्वे यदस्मत्तोऽभिवाञ्छितं ।
ददाम्यहमिति प्रीत्या स्तवैरेभिः सुपूजिता ॥ २९ ॥

देवा ऊचुः ॥

भगवत्या कृतं सर्व्वं न किञ्चिदवशिष्यते ।
यदयं निहतः शत्रुरस्माकं महिषासुरः ॥ ३० ॥
यदि वापि वरो देयस्त्वयास्माकं महेश्वरि ।
संस्मृता संस्मृता त्वन्नो हिंसेथाः परमापदः ॥ ३१ ॥
यश्च मर्त्यःस्तवैरेभिस्त्वां स्तोष्यत्यमलानने ।
तस्य वित्तर्द्धिविभवैर्धनदारादिसम्पदां ॥
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्व्वदाम्बिके ॥ ३२ ॥

ऋषिरुवाच ॥

इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः ।
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥ ३३ ॥
इत्येतत्कथितं भूप सम्भूता सा यथा पुरा ।

देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ३४ ॥
पुनश्च गौरीदेहात् सा समुद्भूता यथाभवत् ।
वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥ ३५ ॥
रक्षणाय च लोकानां देवानामुपकारिणी ।
तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ॥ ३६ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुर-
बधः समाप्तः ॥ ८४ ॥

पञ्चाशीतितमोऽध्यायः ॥

ऋषिरुवाच ॥

पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपतेः ।
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥ १ ॥
तावेव सूर्य्यतां तद्वदधिकारं तथैन्दवं ।
कौवेरमथ याम्यञ्च चक्राते वरुणस्य च ॥ २ ॥
तावेव पवनर्द्धिञ्च चक्रतुर्व्वह्निकर्म्म च ।
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥ ३ ॥
हृताधिकारास्त्रिदशास्ताभ्यां सर्व्वे निराकृताः ।
महासुराभ्यां तां देवीं संस्मरन्त्यपराजितां ॥ ४ ॥
त्वयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ।
भवतां नाशयिष्यामि तत्क्षणात् परमापदः ॥ ५ ॥

इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरं ।
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥ ६ ॥

देवा ऊचुः ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म तां ॥ ७ ॥
रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥ ८ ॥
कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कुर्म्मो नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्व्वाण्यै ते नमो नमः ॥ ९ ॥
दुर्गायै दुर्गपारायै सारायै सर्व्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ १० ॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ ११ ॥
या देवी सर्व्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १२ ॥
या देवी सर्व्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १३ ॥
या देवी सर्व्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १४ ॥
या देवी सर्व्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ॥ १५ ॥

या देवी सर्व्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १६ ॥
या देवी सर्व्वभूतेषु छायारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १७ ॥
या देवी सर्व्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १८ ॥
या देवी सर्व्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १९ ॥
या देवी सर्व्वभूतेषु क्षान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २० ॥
या देवी सर्व्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २१ ॥
या देवी सर्व्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २२ ॥
या देवी सर्व्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २३ ॥
या देवी सर्व्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २४ ॥
या देवी सर्व्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २५ ॥
या देवी सर्व्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २६ ॥

या देवी सर्व्वभूतेषु वृत्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २७ ॥
या देवी सर्व्वभूतेषु स्मृतिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २८ ॥
या देवी सर्व्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २९ ॥
या देवी सर्व्वभूतेषु तुष्टिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३० ॥
या देवी सर्व्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३१ ॥
या देवी सर्व्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३२ ॥
इन्द्रियाणामधिष्ठात्री भूतानाञ्चाखिलेषु या ।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥ ३३ ॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३४ ॥

स्तुता सुरैः पूर्व्वमभीष्टसंश्रयात्
तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥ ३५ ॥
या साम्प्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ।

या च स्मृता तत्क्षणमेव हन्ति नः
सर्व्वापदो भक्तिविनम्रमूर्त्तिभिः ॥ ३६ ॥

ऋषिरुवाच ।

एवं स्तवादियुक्तानां देवानां तत्र पार्व्वती ।
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥ ३७ ॥
साऽब्रवीत्तान् सुरान् सुभ्रुर्भवद्भिः स्तूयतेऽत्र का ।
शरीरकोषतश्चास्याः समुद्भूताब्रवीच्छिवा ॥ ३८ ॥
स्तोत्रं ममैतत्क्रियते शुम्भदैत्यनिराकृतैः ।
देवैः समेतैः समरे निशुम्भेन पराजितैः ॥ ३९ ॥
शरीरकोषाद्यत्तस्याः पार्व्वत्या निःसृताम्बिका ।
कौषिकीति समस्तेषु ततो लोकेषु गीयते ॥ ४० ॥
तस्यां विनिर्गतायान्तु कृष्णाभूत्सापि पार्व्वती ।
कालिकेति समाख्याता हिमाचलकृताश्रया ॥ ४१ ॥
ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरं ।
ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयोः ॥ ४२ ॥
ताभ्यां शुम्भाय चाख्याता अतीव सुमनोहरा ।
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलं ॥ ४३ ॥
नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमं ।
ज्ञायतां काप्यसौ देवी गृह्यताञ्चासुरेश्वर ॥ ४४ ॥
स्त्रीरत्नमतिचार्व्वङ्गी द्योतयन्ती दिशस्त्विषा ।
सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति ॥ ४५ ॥
यानि रत्नाणि मणयो गजाश्वादीनि वै प्रभो ।

त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ॥ ४६ ॥
ऐरावतः समानीतो गजरत्नं पुरन्दरात् ।
पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥ ४७ ॥
विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गने ।
रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतं ॥ ४८ ॥
निधिरेष महापद्मः समानीतो धनेश्वरात् ।
किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजां ॥ ४९ ॥
छत्रन्ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ।
तथायं स्यन्दनवरो यः पुरासीत् प्रजापतेः ॥ ५० ॥
मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ।
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ ५१ ॥
निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः ।
वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ॥ ५२ ॥
एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ।
स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥ ५३ ॥

ऋषिरुवाच ॥

निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ।
प्रेषयामास सुग्रीवं दूतं देव्या महासुरं ॥ ५४ ॥
इति चेति च वक्तव्या सा गत्वा वचनान्मम ।
यथा चाभ्येति संप्रीत्या तथा कार्य्यं त्वया लघु ॥ ५५ ॥
स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ।
सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ ५६ ॥

दूत उवाच ॥

देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥ ५७ ॥
अव्याहताज्ञः सर्व्वासु यः सदा देवयोनिषु ।
निर्ज्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ॥ ५८ ॥
मम त्रैलोक्यमखिलं मम देवा वशानुगाः ।
यज्ञभागानहं सर्व्वानुपाश्नामि पृथक् पृथक् ॥ ५९ ॥
त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ।
तथैव गजरत्नानि हृत्वा देवेन्द्रवाहनं ॥ ६० ॥
क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ।
उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितं ॥ ६१ ॥
यानि चान्यानि देवेषु गन्धर्व्वेषूरगेषु च ।
रत्नभूतानि भूतानि तानि मय्येव शोभने ॥ ६२ ॥
स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयं ।
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयं ॥ ६३ ॥
मां वा ममानुजं वापि निशुम्भमुरुविक्रमं ।
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥ ६४ ॥
परमैश्वर्य्यमतुलं प्राप्स्यसे मत्परिग्रहात् ।
एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥ ६५ ॥

ऋषिरुवाच ॥

इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ।
दुर्गा भगवती भद्रा ययेदं धार्य्यते जगत् ॥ ६६ ॥

देव्युवाच॥

सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित्त्वयोदितं।
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः॥ ६७॥
किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथं।
श्रूयतामल्पबुद्धित्वात् प्रतिज्ञा या कृता पुरा॥ ६८॥
यो मां जयति संग्रामे यो मे दर्पं व्यपोहति।
यो मे प्रतिबलो लोके स मे भर्त्ता भविष्यति॥ ६९॥
तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः।
मां जित्वा किञ्चिरेणात्र पाणिं गृह्णातु मे लघु॥ ७०॥

दूत उवाच॥

अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः।
त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयोः॥ ७१॥
अन्येषामपि दैत्यानां सर्व्वे देवा न वै युधि।
तिष्ठन्ति संमुखे देवि किं पुनः स्त्री त्वमेकिका॥ ७२॥
इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे।
शुम्भादीनां कथन्तेषां स्त्री प्रयास्यसि संमुखं॥ ७३॥
सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः।
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि॥ ७४॥

देव्युवाच॥

एवमेतद्बली शुम्भो निशुम्भश्चातिवीर्य्यवान्।
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा॥ ७५॥

स त्वं गच्छ मयोक्तन्ते यदेतत्सर्व्वमादृतः ।
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत् ॥ ७६ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये देव्या दूत-संवादः ॥ ८५ ॥

षडशीतितमोऽध्यायः ॥

ऋषिरुवाच ॥

इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ।
समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥ १ ॥
तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ।
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनं ॥ २ ॥
हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ।
तामानय बलाद्दुष्टां केशाकर्षणविह्वलां ॥ ३ ॥
तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः ।
स हन्तव्योऽमरो वापि यक्षो गन्धर्व्व एव वा ॥ ४ ॥

ऋषिरुवाच ॥

तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ।
वृतः षष्ठ्या सहस्राणामसुराणां द्रुतं ययौ ॥ ५ ॥
स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थितां ।
जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥ ६ ॥

न चेत् प्रीत्याद्य भवती मद्भर्त्तारमुपैष्यति ।
ततो बलान्नयाम्येष केशाकर्षणविह्वलां ॥ ७ ॥

देव्युवाच ॥

दैत्येश्वरेण प्रहितो बलवान् बलसंवृतः ।
बलान्नयसि मामेवं ततः किन्ते करोम्यहं ॥ ८ ॥

ऋषिरुवाच ॥

इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ।
हुंकारेणैव तं भस्म सा चकाराम्बिका ततः ॥ ९ ॥
अथ क्रुद्धं महासैन्यमसुराणान्तथाम्बिकां ।
ववर्ष शायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥ १० ॥
ततो धुतसटः कोपात् कृत्वा नादं सुभैरवं ।
पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥ ११ ॥
कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ।
आक्रान्त्या चाधरेणान्यान् जघान सुमहासुरान् ॥ १२ ॥
केषाञ्चित्पाटयामास नखैः कोष्ठानि केशरी ।
तथा तलप्रहारेण शिरांसि कृतवान् पृथक् ॥ १३ ॥
विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ।
पपौ च रुधिरं कोष्ठादन्येषां धुतकेशरः ॥ १४ ॥
क्षणेन तद्बलं सर्व्वं क्षयं नीतं महात्मना ।
तेन केशरिणा देव्या वाहनेनातिकोपिना ॥ १५ ॥
श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनं ।
बलञ्च क्षयितं कृत्स्नं देवीकेशरिणा ततः ॥ १६ ॥

चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ।
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥ १७ ॥
हे चण्ड हे मुण्ड बलैर्बहुलैः परिवारितौ ।
तत्र गच्छतं गत्वा च सा समानीयतां लघु ॥ १८ ॥
केशेष्वाकृष्य बद्धा वा यदि वः संशयो युधि ।
तदाशेषायुधैः सर्व्वैरसुरैर्विनिहन्यतां ॥ १९ ॥
तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ।
शीघ्रमागम्यतां बद्धा गृहीत्वा तामथाम्बिकां ॥ २० ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शुम्भनिशुम्भ-सेनानीधूम्रलोचनबधः ॥ ८६ ॥

सप्ताशीतितमोऽध्यायः ॥

ऋषिरुवाच ॥

आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ।
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥ १ ॥
ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थितां ।
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥ २ ॥
ते दृष्ट्वा तां समादातुमुद्यमञ्चक्रुरुद्यताः ।
आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥ ३ ॥
ततः कोपञ्चकारोच्चैरम्बिका तानरीन् प्रति ।
कोपेन चास्या वदनं मसीवर्णमभूत्तदा ॥ ४ ॥

भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतं।
काली करालवदना विनिष्क्रान्तासिपाशिनी॥ ५॥
विचित्रखट्वाङ्गधरा नरमालाविभूषणा।
द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा॥ ६॥
अतिविस्तारवदना जिह्वाललनभीषणा।
निमग्ना रक्तनयना नादापूरितदिङ्मुखा॥ ७॥
सा वेगेनाभिपतिता घातयन्ती महासुरान्।
सैन्ये तत्र सुरारीणामभक्षयत तद्बलं॥ ८॥
पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान्।
समादायैकहस्तेन मुखे चिक्षेप वारणान्॥ ९॥
तथैव योधं तुरगै रथं सारथिना सह।
निक्षिप्य वक्त्रे दशनैश्चर्व्वयत्यतिभैरवं॥ १०॥
एकं जग्राह केशेषु ग्रीवायामथ चापरं।
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत्॥ ११॥
तैर्म्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः।
मुखेन जग्राह रुषा दशनैर्म्मथितान्यपि॥ १२॥
बलिनां तद्बलं सर्व्वमसुराणां महात्मनां।
ममर्द्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा॥ १३॥
असिना निहताः केचित् केचित् खट्वाङ्गताडिताः।
जग्मुर्व्विनाशमसुरा दन्ताग्राभिहतास्तथा॥ १४॥
क्षणेन तद्बलं सर्व्वमसुराणां निपातितं।
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणां॥ १५॥

शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ।
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥ १६ ॥
तानि चक्राण्यनेकानि विशमानानि तन्मुखं ।
बभुर्यथार्कबिम्बानि सुबहूनि घनोदरं ॥ १७ ॥
ततो जहासातिरुषा भीमं भैरवनादिनी ।
काली करालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥ १८ ॥
उत्थाय च महासिंहं देवी चण्डमधावत ।
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥ १९ ॥
अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितं ।
तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥ २० ॥
हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितं ।
मुण्डञ्च सुमहावीर्यं दिशो भेजे भयातुरं ॥ २१ ॥
शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ।
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकां ॥ २२ ॥
मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ।
युद्धयज्ञे स्वयं शुम्भं निशुम्भञ्च हनिष्यसि ॥ २३ ॥

ऋषिरुवाच ॥

तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ।
उवाच कालीं कल्याणी ललितं चण्डिका वचः ॥ २४ ॥
यस्माच्चण्डञ्च मुण्डञ्च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि भविष्यसि ॥ २५ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधः ॥ ८७ ॥

अष्टाशीतितमोऽध्यायः ॥

ऋषिरुवाच ॥

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ।
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ १ ॥
ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ।
उद्योगं सर्व्वसैन्यानान्दैत्यानामादिदेश ह ॥ २ ॥
अद्य सर्व्वबलैर्दैत्याः षडशीतिरुदायुधाः ।
कम्बूनाञ्चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ॥ ३ ॥
कोटिवीर्य्याणि पञ्चाशदसुराणां कुलानि वै ।
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥ ४ ॥
कालका दौर्हृता मौर्य्याः कालकेयास्तथासुराः ।
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥ ५ ॥
इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ।
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥ ६ ॥
आयातं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणं ।
ज्यास्वनैः पूरयामास धरणीगगनान्तरं ॥ ७ ॥
ततः सिंहो महानादमतीव कृतवान्नृप ।
घण्टास्वनेन तान्नादानम्बिका चोपवृंहयत् ॥ ८ ॥
धनुर्ज्यासिंहघण्टानां शब्दापूरितदिङ्मुखा ।
निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥ ९ ॥

तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्द्दिशं ।
देवीसिंहस्तथा काली सरोषैः परिवारिता ॥ १० ॥
एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषां ।
भवायामरसिंहानामतिवीर्य्यबलान्विताः ॥ ११ ॥
ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥ १२ ॥
यस्य देवस्य यद्रूपं यथा भूषणवाहनं ।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥ १३ ॥
हंसयुक्ते विमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥ १४ ॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥ १५ ॥
कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥ १६ ॥
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥ १७ ॥
यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुं ॥ १८ ॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥ १९ ॥
वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥ २० ॥

ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।
हन्यन्तामसुराः शीघ्रं मम प्रीत्याह चण्डिकां ॥ २१ ॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी ॥ २२ ॥
सा चाह धूम्रजटिलमीशानमपराजिता ।
दूतत्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः ॥ २३ ॥
ब्रूहि शुम्भं निशुम्भञ्च दानवावतिगर्वितौ ।
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥ २४ ॥
त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ।
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥ २५ ॥
बलावलेपादथचेद्भवन्तो युद्धकाङ्क्षिणः ।
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥ २६ ॥
यतो नियुक्तो दैत्येन तया देव्या शिवः स्वयं ।
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥ २७ ॥
तेऽपि श्रुत्वा वचो देव्याः सर्व्वाख्यातं महासुराः ।
अमर्षापूरिता जग्मुर्यतः कात्यायनी स्थिता ॥ २८ ॥
ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ।
ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥ २९ ॥
सा च तान् प्रहितान् बाणान् शूलचक्रपरश्वधान् ।
चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः ॥ ३० ॥
तस्याग्रतस्तथा काली शूलपातविदारितान् ।
खट्टाङ्गपोथितांश्चारीन् कुर्व्वती व्यचरत्तदा ॥ ३१ ॥

कमण्डलुजलाक्षेपहतवीर्य्यान् हतौजसः ।
ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति ॥ ३२ ॥
माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ।
दैत्यान् जघान कौमारी तथा शक्त्यातिकोपना ॥ ३३ ॥
ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः ।
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥ ३४ ॥
तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ।
वाराहमूर्त्त्या न्यपतंश्चक्रेण च विदारिताः ॥ ३५ ॥
नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान् ।
नारसिंही चचाराजौ नादापूर्णदिगम्बरा ॥ ३६ ॥
चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ।
पेतुः पृथिव्यां पतितास्तांश्चखादाथ सा तदा ॥ ३७ ॥
इति मातृगणं क्रुद्धं मर्द्दयन्तं महासुरान् ।
दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३८ ॥
पलायनपरान् दृष्ट्वा दैत्यान्मातृगणार्दितान् ।
योद्धुमभ्याययौ क्रुद्धो रक्तवीजो महासुरः ॥ ३९ ॥
रक्तविन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुरः ॥ ४० ॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ।
ततश्चैन्द्री स्ववज्रेण रक्तवीजमताडयत् ॥ ४१ ॥
कुलिशेनाहतस्याशु तस्य सुस्राव शोणितं ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥ ४२ ॥

यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ।
तावन्तः पुरुषा जातास्तद्वीर्य्यबलविक्रमाः ॥ ४३ ॥
ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः ।
समं मातृभिरत्युग्रशस्त्रपातातिभीषणं ॥ ४४ ॥
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ।
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥ ४५ ॥
वैष्णवी समरे चैनं चक्रेणाभिजघान ह ।
गदया ताडयामास ऐन्द्री तमसुरेश्वरं ॥ ४६ ॥
वैष्णवी चक्रभिन्नस्य रुधिरस्रावसम्भवैः ।
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥ ४७ ॥
शक्त्या जघान कौमारी वाराही च तथासिना ।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरं ॥ ४८ ॥
स चापि गदया दैत्यः सर्व्वा एवाहनत् पृथक् ।
मातृः कोपसमाविष्टो रक्तबीजो महासुरः ॥ ४९ ॥
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥ ५० ॥
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमं ॥ ५१ ॥
तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा ।
उवाच कालीं चामुण्डे विस्तरं वदनं कुरु ॥ ५२ ॥
मच्छस्त्रपातसम्भूतान् रक्तबिन्दून्महासुरान् ।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिता ॥ ५३ ॥

भक्षयन्ती चर रणे तदुत्पन्नान् महासुरान् ।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥ ५४ ॥
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तं ॥ ५५ ॥
मुखेन काली जगृहे रक्तवीजस्य शोणितं ।
ततोऽसावाजघानाथ गदया तत्र चण्डिकां ॥ ५६ ॥
न चास्या वेदनाञ्चक्रे गदापातोऽल्पिकामपि ।
तस्याहतस्य देहात्तु बहु सुस्राव शोणितं ॥ ५७ ॥
यतस्ततस्तद्वक्त्रेण चामुण्डा संप्रतीच्छति ।
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ॥ ५८ ॥
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितं ।
देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ॥ ५९ ॥
जघान रक्तवीजं तं चामुण्डापीतशोणितं ।
स पपात महीपृष्ठे शस्त्रसंघसमाहतः ॥ ६० ॥
नीरक्तश्च महीपाल रक्तवीजो महासुरः ।
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ॥
तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥ ६१ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
रक्तवीजवधः ॥ ८८ ॥

ऊनगवतितमोऽध्यायः ॥

राजोवाच ॥

विचित्रमिदमाख्यातं भगवन् भवता मम ।
देव्याश्चरितमाहात्म्यं रक्तवीजबधाश्रितं ॥ १ ॥
भूयश्चेच्छाम्यहं श्रोतुं रक्तवीजे निपातिते ।
चकार शुम्भो यत्कर्म्म निशुम्भश्चातिकोपनः ॥ २ ॥

ऋषिरुवाच ॥

चकार कोपमतुलं रक्तवीजे निपातिते ।
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥ ३ ॥
हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ।
अभ्यधावन्निशुम्भोऽथ मुख्ययाऽसुरसेनया ॥ ४ ॥
तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ।
सन्दष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥ ५ ॥
आजगाम महावीर्य्यः शुम्भोऽपि स्वबलैर्वृतः ।
निहन्तुं चण्डिकां कोपात्कृत्वा युद्धन्तु मातृभिः ॥ ६ ॥
ततो युद्धमतीवासीद्देव्याः शुम्भनिशुम्भयोः ।
शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥ ७ ॥
चिच्छेदास्तान्छरांस्ताभ्यां चण्डिकाशु शरोत्करैः ।
ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ ॥ ८ ॥

निशुम्भो निशितं खड्गं चर्म्म चादाय सुप्रभं ।
अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमं ॥ ९ ॥
ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमं ।
निशुम्भस्याशु चिच्छेद चर्म्म चाप्यष्टचन्द्रकं ॥ १० ॥
छिन्ने चर्म्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ।
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागतां ॥ ११ ॥
कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः ।
आयातं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥ १२ ॥
आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति ।
सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ॥ १३ ॥
ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवं ।
आहत्य देवी बाणौघैरपातयत भूतले ॥ १४ ॥
तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ।
भ्रातर्य्यतीवसंक्रुद्धः प्रययौ हन्तुमम्बिकां ॥ १५ ॥
स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ।
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥ १६ ॥
तमायान्तं समालोक्य देवी शङ्खमवादयत् ।
ज्याशब्दञ्चापि धनुषश्चकारातीव दुःसहं ॥ १७ ॥
पूरयामास ककुभो निजघण्टास्वनेन च ।
समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥ १८ ॥
ततः सिंहो महानादैस्त्याजितेभमहामदैः ।
पूरयामास गगनं गान्तथोपदिशो दश ॥ १९ ॥

ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ।
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥ २० ॥
अट्टाट्टहासमशिवं शिवदूती चकार ह ।
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ ॥ २१ ॥
दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा ।
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥ २२ ॥
शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ।
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥ २३ ॥
सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरं ।
निर्घातनिस्वनो घोरो जितवानवनीपते ॥ २४ ॥
शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् ।
चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥ २५ ॥
ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तं ।
स तदाभिहतो भूमौ मूर्छितो निपपात ह ॥ २६ ॥
ततो निशुम्भः संप्राप्य चेतनामात्तकार्मुकः ।
आजघान शरैर्देवीं कालीं केशरिणं तथा ॥ २७ ॥
पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ।
चक्रायुधेन दितिजश्छादयामास चण्डिकां ॥ २८ ॥
ततो भगवती क्रुद्धा दुर्गा दुर्गार्त्तिनाशिनी ।
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥ २९ ॥
ततो निशुम्भो वेगेन गदामादाय चण्डिकां ।
अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ॥ ३० ॥

तस्यापतत एवाशु गदाश्छिच्छेद चण्डिका ।
खड्गेन शितधारेण स च शूलं समाददे ॥ ३१ ॥
शूलहस्तं समायान्तं निशुम्भममरार्दनं ।
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥ ३२ ॥
भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ।
महाबलो महावीर्य्यस्तिष्ठेति पुरुषो वदन् ॥ ३३ ॥
तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्तदा ।
शिरश्छिच्छेद खड्गेन ततोऽसावपतद्भुवि ॥ ३४ ॥
ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् ।
असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥ ३५ ॥
कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ।
ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥ ३६ ॥
माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ।
वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ॥ ३७ ॥
खण्डखण्डञ्च चक्रेण वैष्णव्या दानवाः कृताः ।
वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ॥ ३८ ॥
केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ।
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥ ३९ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये निशुम्भवधः ॥ ८९ ॥

## नवतितमोऽध्यायः ॥

ऋषिरुवाच ॥

निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितं ।
हन्यमानं बलञ्चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥ १ ॥
बलावलेपदुष्टे त्वं मा दुर्गे गर्व्वमावह ।
अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी ॥ २ ॥

देव्युवाच ॥

एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥ ३ ॥
ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयं ।
तस्या देव्याः स्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥ ४ ॥

देव्युवाच ॥

अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता ।
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥ ५ ॥

ऋषिरुवाच ॥

ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ।
पश्यतां सर्व्वदेवानामसुराणाञ्च दारुणं ॥ ६ ॥
शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ।
तयोर्युद्धमभूद्भूयः सर्व्वलोकभयङ्करं ॥ ७ ॥

दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ।
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥ ८ ॥
मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ।
बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभिः ॥ ९ ॥
ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ।
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ १० ॥
छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ।
चिच्छेद देवी चक्रेण तामप्यस्य करस्थितां ॥ ११ ॥
ततः खड्गमुपादाय शतचन्द्रञ्च भानुमत् ।
अभ्यधावत्तदा देवी दैत्यानामधिपेश्वरः ॥ १२ ॥
तस्यापतत एवाशु खड्गञ्चिच्छेद चण्डिका ।
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलं ॥ १३ ॥
हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ।
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ॥ १४ ॥
चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ।
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥ १५ ॥
स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ।
देव्यास्तञ्चापि सा देवी तलेनोरस्यताडयत् ॥ १६ ॥
तलप्रहाराभिहतो निपपात महीतले ।
स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥ १७ ॥
उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ।
तत्रापि सा निराधारा युयुधे तेन चण्डिका ॥ १८ ॥

नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परं ।
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकं ॥ १९ ॥
ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ।
उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥ २० ॥
स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ।
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ॥ २१ ॥
तमायान्तं ततो देवी सर्व्वदैत्यजनेश्वरं ।
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥ २२ ॥
स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ।
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्व्वतां ॥ २३ ॥
ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ।
जगत् स्वास्थ्यमतीवाप निर्म्मलञ्चाभवन्नभः ॥ २४ ॥
उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ।
सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥ २५ ॥
ततो देवगणाः सर्व्वे हर्षनिर्भरमानसाः ।
बभूवुर्निहते तस्मिन् गन्धर्व्वा ललितं जगुः ॥ २६ ॥
अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ।
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥
जज्वलुश्चाग्नयः शान्ताः शान्तदिग्जनितस्वनाः ॥ २७ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शुम्भवधः ॥ ९० ॥

एकनवतितमोऽध्यायः ॥

ऋषिरुवाच ॥

देव्या हते तत्र महासुरेन्द्रे
सेन्द्राः सुरा वह्निपुरोगमास्तां ।
कात्यायनीं तुष्टुवुरिष्टलम्भा-
द्विकाशिवक्त्रास्तु विकाशिताशाः ॥ १ ॥
देवि प्रपन्नार्त्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य ॥ २ ॥
आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थितासि ।
अपां स्वरूपस्थितया त्वयैत-
दाप्याय्यते कृत्स्नमलङ्घ्यवीर्य्ये ॥ ३ ॥
त्वं वैष्णवी शक्तिरनन्तवीर्य्या
विश्वस्य वीजं परमासि माया ।
सम्मोहितं देवि समस्तमेतत्
त्वं वै प्रपन्ना भुवि मुक्तिहेतुः ॥ ४ ॥
विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु ।

त्वयैकया पूरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरा परोक्तिः ॥ ५ ॥

सर्व्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी ।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥ ६ ॥
सर्व्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥ ७ ॥
कलाकाष्ठादिरूपेण परिणामप्रदायिनी ।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥ ८ ॥
सर्व्वमङ्गलमङ्गल्ये शिवे सर्व्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ ९ ॥
सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥ १० ॥
हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ।
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥ ११ ॥
त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥ १२ ॥
मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥ १३ ॥
शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे ।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥ १४ ॥
गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥ १५ ॥

नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे ।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥ १६ ॥
किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥ १७ ॥
शिवदूतीस्वरूपेण हतदैत्यमहाबले ।
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥ १८ ॥
दंष्ट्राकरालवदने शिरोमालाविभूषणे ।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥ १९ ॥
लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वध ध्रुवे ।
महारात्रि महाविद्ये नारायणि नमोऽस्तु ते ॥ २० ॥
मेधे सरस्वति वरे भूति बाभ्रवि तामसि ।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥ २१ ॥
सर्व्वस्वरूपे सर्व्वेशे सर्व्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ २२ ॥
एतत्ते वदनं सौम्यं लोचनत्रयभूषितं ।
पातु नः सर्व्वभूतेभ्यः कात्यायनि नमोऽस्तु ते ॥ २३ ॥
ज्वालाकरालमत्युग्रमशेषासुरसूदनं ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥ २४ ॥
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥ २५ ॥
असुरासृग्वसापङ्कचर्च्चितास्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयं ॥ २६ ॥

रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥ २७ ॥
एतत्कृतं यत्कदनं त्वयाद्य
धर्मद्विषां देवि महासुराणां ।
रूपैरनेकैर्बहुधात्ममूर्त्तिं
कृत्वाम्बिके तत्प्रकरोति कान्या ॥ २८ ॥
विद्यासु शास्त्रेषु विवेकदीपे-
ष्वाद्येषु वाक्येषु च का त्वदन्या ।
ममत्वगर्त्तेऽतिमहान्धकारे
विभ्रामयत्येतदतीव विश्वं ॥ २९ ॥
रक्षांसि यत्रोग्रविषाश्च नागा
यत्रारयो दस्युबलानि यत्र ।
दावानलो यत्र तथाब्धिमध्ये
तत्र स्थिता त्वं परिपासि विश्वं ॥ ३० ॥
विश्वेश्वरि त्वं परिपासि विश्वं
विश्वात्मिका धारयसीति विश्वं ।
विश्वेशवन्द्या भवती भवन्ति
विश्वाश्रया ये त्वयि भक्तिनम्राः ॥ ३१ ॥
देवि प्रसीद परिपालय नोऽरिभीते-
र्नित्यं यथासुरवधादधुनैव सद्यः ।

पापानि सर्व्वजगतां प्रशमं नयाशु
उत्पातपाकजनितांश्च महोपसर्गान् ॥ ३२ ॥
प्रणतानां प्रसीद त्वं देवि विश्वार्त्तिहारिणि ।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥ ३३ ॥

देव्युवाच ॥

वरदाहं सुरगणा वरं यं मनसेच्छथ ।
तं वृणुध्वं प्रयच्छामि जगतामुपकारकं ॥ ३४ ॥

देवा ऊचुः ॥

सर्व्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्य्यमस्मद्वैरिविनाशनं ॥ ३५ ॥

देव्युवाच ॥

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ॥ ३६ ॥
नन्दगोपगृहे जाता यशोदागर्भसम्भवा ।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥ ३७ ॥
पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ।
अवतीर्य्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ॥ ३८ ॥
भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् ।
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥ ३९ ॥
ततो मां देवताः स्वर्गे मर्त्त्यलोके च मानवाः ।
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकां ॥ ४० ॥
भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ।

मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा ॥ ४१ ॥
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ।
कीर्त्तयिष्यन्ति मनुजाः शताक्षीमिति मानवाः ॥ ४२ ॥
ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥ ४३ ॥
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरं ॥ ४४ ॥
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ।
रक्षांसि क्षययिष्यामि मुनीनां त्राणकारणात् ॥ ४५ ॥
तदा मां मुनयः सर्व्वे स्तोष्यन्त्यानम्रमूर्त्तयः ।
भीमा देवीति विख्यातं तन्मे नाम भविष्यति ॥ ४६ ॥
यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ।
तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदं ॥ ४७ ॥
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं ।
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्व्वतः ॥ ४८ ॥
इत्थं यदा यदा बाधा दानवोत्था भविष्यति ।
तदा तदावतीर्य्याहं करिष्याम्यरिसंक्षयं ॥ ४९ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
देव्याः स्तुतिः ॥ ९१ ॥

द्विनवतितमोऽध्यायः ॥

देव्युवाच ॥

एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ।
तस्याहं सकलां बाधां शमयिष्याम्यसंशयं ॥ १ ॥
मधुकैटभनाशञ्च महिषासुरघातनं ।
कीर्त्तयिष्यन्ति ये तद्वद्वधं शुम्भनिशुम्भयोः ॥ २ ॥
अष्टम्याञ्च चतुर्द्दश्यां नवम्याञ्चैकचेतसः ।
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमं ॥ ३ ॥
न तेषां दुष्कृतं किञ्चिद्दुष्कृतोत्था न चापदः ।
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनं ॥ ४ ॥
शत्रुतो न भयं तस्य दस्युतो वा न राजतः ।
न शस्त्रानलतोयौघात् कदाचित् सम्भविष्यति ॥ ५ ॥
तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ।
श्रोतव्यञ्च सदा भक्त्या परं स्वस्त्ययनं हि तत् ॥ ६ ॥
उपसर्गानशेषांस्तु महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ ७ ॥
यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम ।
सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितं ॥ ८ ॥
बलिप्रदाने पूजायामग्निकार्य्ये महोत्सवे ।
सर्वं ममैतच्चरितमुच्चार्य्यं श्राव्यमेव च ॥ ९ ॥

जानताऽज्ञानता वापि बलिपूजां तथा कृतां।
प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतं॥ १०॥
शरत्काले महापूजा क्रियते या च वार्षिकी।
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः॥ ११॥
सर्व्वाबाधाविनिर्म्मुक्तो धनधान्यसुतान्वितः।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः॥ १२॥
श्रुत्वा ममैतन्माहात्म्यं तथाचोत्पत्तयः शुभाः।
पराक्रमञ्च युद्धेषु जायते निर्भयः पुमान्॥ १३॥
रिपवः संक्षयं यान्ति कल्याणञ्चोपपद्यते।
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वतां॥ १४॥
शान्तिकर्म्मणि सर्व्वत्र तथा दुःस्वप्नदर्शने।
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम॥ १५॥
उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः।
दुःस्वप्नञ्च नृभिर्दृष्टं सुस्वप्नमुपजायते॥ १६॥
बालग्रहाभिभूतानां बालानां शान्तिकारकं।
संघातभेदे च नृणां मैत्रीकरणमुत्तमं॥ १७॥
दुर्वृत्तानामशेषाणां बलहानिकरं परं।
रक्षोभूतपिशाचानां पठनादेव नाशनं॥ १८॥
सर्व्वं ममैतन्माहात्म्यं मम सन्निधिकारकं।
पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः॥ १९॥
विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्न्निशं।
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या॥ २०॥

प्रीतिर्मे क्रियते सास्मिन् सकृत्सुचरिते श्रुते ।
श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ २१ ॥
रक्षाङ्करोति भूतेभ्यो जन्मनां कीर्त्तनं मम ।
युद्धेषु चरितं यन्मे दुष्टदैत्यनिवर्हणं ॥ २२ ॥
अस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते ।
युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥ २३ ॥
ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिं ।
अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः ॥ २४ ॥
दस्युभिर्वावृतः शून्ये गृहीतो वापि शत्रुभिः ।
सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥ २५ ॥
राज्ञा क्रुद्धेन चाज्ञप्तो बध्यो बन्धगतोऽपि वा ।
आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ २६ ॥
पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे ।
सर्व्वाबाधासु घोरासु वेदनाभ्यर्द्दितोऽपि वा ॥ २७ ॥
स्मरन्ममैतच्चरितं नरो मुच्येत सङ्कटात् ।
मम प्रभावात् सिंहाद्या दस्यवो वैरिणस्तथा ॥
दूरादेव पलायन्ते स्मरतश्चरितं मम ॥ २८ ॥

ऋषिरुवाच ॥

इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ।
पश्यतामेव देवानां तत्रैवान्तरधीयत ॥ २९ ॥
तेऽपि देवा निरातङ्काः स्वाधिकारान् यथा पुरा ।
यज्ञभागभुजः सर्व्वे चक्रुर्विनिहतारयः ॥ ३० ॥

दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ।
जगद्विध्वंसिनि तस्मिन्महोग्रेऽतुलविक्रमे ॥ ३१ ॥
निशुम्भे च महावीर्ये शेषाः पातालमाययुः ।
एवं भगवती देवी सा नित्यापि पुनः पुनः ॥ ३२ ॥
सम्भूय कुरुते भूप जगतः परिपालनं ।
तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ॥ ३३ ॥
सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ।
व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर ॥ ३४ ॥
महाकाल्या महाकाले महामारीस्वरूपया ।
सैव काले महामारी सैव सृष्टिर्भवत्यजा ॥ ३५ ॥
स्थितिं करोति भूतानां सैव काले सनातनी ।
भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ॥ ३६ ॥
सैवाभावे तथाऽलक्ष्मीर्विनाशायोपजायते ।
स्तुता संपूजिता पुष्पैर्धूपगन्धादिभिस्तथा ॥
ददाति वित्तं पुत्रांश्च मतिं धर्मे तथा शुभां ॥ ३७ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शुम्भनिशुम्भवधः समाप्तः ॥ ९२ ॥

---

त्रिनवतितमोऽध्यायः ॥

ऋषिरुवाच ॥

एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमं ।
एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥ १ ॥

विद्या तथैव क्रियते भगवद्विष्णुमायया ।
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥ २ ॥
मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे ।
तामुपैहि महाराज शरणं परमेश्वरीं ॥
आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥ ३ ॥

मार्कण्डेय उवाच ॥

इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ।
प्रणिपत्य महाभागं तमृषिं शंसितव्रतं ॥ ४ ॥
निर्विण्णोऽतिममत्वेन राज्यापहरणेन च ।
जगाम सद्यस्तपसे स च वैश्यो महामुने ॥ ५ ॥
सन्दर्शनार्थमम्बाया नदीपुलिनसंस्थितः ।
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥ ६ ॥
तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्त्तिं महीमयीं ।
अर्हणाञ्चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥ ७ ॥
निराहारौ यताहारौ तन्मनस्कौ समाहितौ ।
ददतुस्तौ बलिञ्चैव निजगात्रासृगुक्षितं ॥ ८ ॥
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ।
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥ ९ ॥

देव्युवाच ॥

यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ।
मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् ॥ १० ॥

मार्कण्डेय उवाच॥

ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि।
अत्र चैव निजं राज्यं हतशत्रुबलं बलात्॥ ११ ॥
सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः।
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकं॥ १२ ॥

देव्युवाच॥

स्वल्पैरहोभिर्नृपते स्वराज्यं प्राप्स्यते भवान्।
हत्वा रिपूनस्खलितं तव तत्र भविष्यति॥ १३ ॥
मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः।
सावर्णिको नाम मनुर्भवान् भुवि भविष्यति॥ १४ ॥
वैश्यवर्य्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः।
तं प्रयच्छामि संसिद्धौ तव ज्ञानं भविष्यति॥ १५ ॥

मार्कण्डेय उवाच॥

इति दत्वा तयोर्देवी यथाभिलषितं वरं।
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता॥ १६ ॥
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः।
सूर्य्याज्जन्म समासाद्य सावर्णिर्भविता मनुः॥ १७ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्यं समाप्तं॥ ९३ ॥

## चतुर्णवतितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

सावर्णिकमिदं सम्यक् प्रोक्तं मन्वन्तरं तव ।
तथैव देवीमाहात्म्यं महिषासुरघातनं ॥ १ ॥
उत्पत्तयश्च या देव्या मातृणाञ्च महाहवे ।
तथैव सम्भवो देव्याश्चामुण्डाया यथा भवः ॥ २ ॥
शिवदूत्याश्च माहात्म्यं बधः शुम्भनिशुम्भयोः ।
रक्तवीजबधश्चैव सर्व्वमेतत्तवोदितं ॥ ३ ॥
श्रूयतां मुनिशार्दूल सावर्णिकमथापरं ।
दक्षपुत्त्रश्च सावर्णो भावी यो नवमो मनुः ॥ ४ ॥
कथयामि मनोस्तस्य ये देवा मुनयो नृपाः ।
परामरीचिभर्गाश्च सुधर्म्माणस्तथा सुराः ॥ ५ ॥
एते त्रिधा भविष्यन्ति सर्व्वे द्वादशका गणाः ।
तेषामिन्द्रो भविष्यस्तु सहस्राक्षो महाबलः ॥ ६ ॥
साम्प्रतं कार्त्तिकेयो यो वह्निपुत्त्रः षडाननः ।
अद्भुतो नाम शक्रोऽसौ भावी तस्यान्तरे मनोः ॥ ७ ॥
मेधातिथिर्व्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा ।
सप्तर्षयोऽन्यः सवलस्तथान्यो हव्यवाहनः ॥ ८ ॥
धृष्टकेतुर्व्वर्हकेतुः पञ्चहस्तो निरामयः ।
पृथुश्रवास्तथार्च्चिष्मान् भूरिद्युम्नो बृहद्भयः ॥ ९ ॥

एते नृपसुतास्तस्य दक्षपुत्रस्य वै नृपाः ।
मनोस्तु दशमस्यान्यच्छृणु मन्वन्तरं द्विज ॥ १० ॥
मन्वन्तरे च दशमे ब्रह्मपुत्रस्य धीमतः ।
सुखासीना निरुद्धाश्च त्रिःप्रकाराः सुराः स्मृताः ॥ ११ ॥
शतसंख्या हि ते देवा भविष्या भाविनो मनोः ।
यत्प्राणिनां शतं भावि तद्देवानां तदा शतं ॥ १२ ॥
शान्तिरिन्द्रस्तथा भावी सर्व्वैरिन्द्रगुणैर्युतः ।
सप्तर्षींस्तान् निबोध त्वं ये भविष्यन्ति वै तदा ॥ १३ ॥
आपोमूर्त्तिर्हविष्मांश्च सुकृती सत्य एव च ।
नाभागोऽप्रतिमश्चैव वाशिष्ठश्चैव सप्तमः ॥ १४ ॥
सुक्षेत्रश्चोत्तमौजाश्च भूमिसेनश्च वीर्य्यवान् ।
शतानीकोऽथ वृषभो ह्यनमित्रो जयद्रथः ॥ १५ ॥
भूरिद्युम्नः सुपर्व्वा च तस्यैते तनया मनोः ।
भविष्या धर्म्मपुत्रस्य सावर्णस्यान्तरं शृणु ॥ १६ ॥
विहङ्गमाः कामगाश्च निर्म्माणरतयस्तथा ।
त्रिःप्रकारा भविष्यन्ति एकैकस्त्रिंशतो गणाः ॥ १७ ॥
मासर्त्तुर्दिवसा ये तु निर्म्माणरतयस्तु ते ।
विहङ्गमा रात्रयोऽथ मौहूर्त्ताः कामगा गणाः ॥ १८ ॥
इन्द्रो वृषाख्यो भविता तेषां प्रख्यातविक्रमः ।
हविष्मांश्च वरिष्ठश्च ऋष्टिरन्यस्तथारुणिः ॥ १९ ॥
निश्चरश्चानघश्चैव विष्टिश्चान्यो महामुनिः
सप्तर्षयोऽन्तरे तस्मिन्नग्निदेवश्च सप्तमः ॥ २० ॥

सर्व्वगः सुशर्म्मा च देवानीकः पुरूद्वहः ।
हेमधन्वा दृढायुश्च भाविनस्तत्सुता नृपाः ॥ २१ ॥
द्वादशे रुद्रपुत्त्रस्य प्राप्ते मन्वन्तरे मनोः ।
सावर्णाख्यस्य ये देवा मुनयश्च शृणुष्व तान् ॥ २२ ॥
सुधर्म्माणः सुमनसो हरिता रोहितास्तथा ।
सुवर्णाश्च सुरास्तत्र पञ्चैते दशका गणाः ॥ २३ ॥
तेषामिन्द्रस्तु विज्ञेय ऋतधामा महाबलः ।
सर्व्वैरिन्द्रगुणैर्युक्तः सप्तर्षीनपि मे शृणु ॥ २४ ॥
द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः ।
तपोरतिस्तथैवान्यः सप्तमस्तु तपोधृतिः ॥ २५ ॥
देववानुपदेवश्च देवश्रेष्ठो विदूरथः ।
मित्रवान् मित्रविन्दश्च भाविनस्तत्सुता नृपाः ॥ २६ ॥
त्रयोदशस्य पर्य्याये रौच्याख्यस्य मनोः सुतान् ।
सप्तर्षींश्च नृपांश्चैव गदतो मे निशामय ॥ २७ ॥
सुधर्म्माणः सुरास्तत्र सुकर्म्माणस्तथापरे ।
सुशर्म्माणः सुरा ह्येते समस्ता मुनिसत्तम ॥ २८ ॥
महाबलो महावीर्य्यस्तेषामिन्द्रो दिवस्पतिः ।
भविष्यानथ सप्तर्षीन् गदतो मे निशामय ॥ २९ ॥
धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः ।
निर्म्मोहः सुतपाश्चान्यो निष्प्रकम्पश्च सप्तमः ॥ ३० ॥
चित्रसेनो विचित्रश्च नयतिर्निर्भयो दृढः ।
सुनेत्रः क्षत्रबुद्धिश्च सुव्रतश्चैव तत्सुताः ॥ ३१ ॥

इति श्रीमार्कण्डेयपुराणे रौच्यमन्वन्तरे ॥ ९४ ॥

पञ्चनवतितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

रुचिः प्रजापतिः पूर्व्वं निर्ममो निरहङ्कृतः ।
असक्तो मितशायी च चचार पृथिवीमिमां ॥ १ ॥
अनग्निमनिकेतन्तमेकाहारमनाश्रमं ।
विमुक्तसङ्गं तं दृष्ट्वा प्रोचुस्तत्पितरो मुनिं ॥ २ ॥

पितर ऊचुः ॥

वत्स कस्मात्त्वया पुण्यो न कृतो दारसंग्रहः ।
स्वर्गापवर्गहेतुत्वाद्बन्धस्तेनानिशं विना ॥ ३ ॥
गृही समस्तदेवानां पितॄणाञ्च तथार्हणां ।
ऋषीणामतिथीनाञ्च कुर्व्वंल्लोकानुपाश्नुते ॥ ४ ॥
स्वाहोच्चारणतो देवान् स्वधोच्चारणतः पितॄन् ।
विभजत्यन्नदानेन भूताद्यानतिथीनपि ॥ ५ ॥
स त्वं दैवादृणाद्बन्धं बन्धमस्मदृणादपि ।
अवाप्नोषि मनुष्येभ्यो भूतेभ्यश्च दिने दिने ॥ ६ ॥
अनुत्पाद्य सुतान् देवानसन्तर्प्य पितॄंस्तथा ।
अकृत्वा च कथं मौढ्यात् सुगतिं गन्तुमिच्छसि ॥ ७ ॥
क्लेशमेकैककं पुत्त्र मन्यामोऽत्र भवेत्तव ।
मृतस्य नरकं तद्वत् क्लेशमेवान्यजन्मानि ॥ ८ ॥

रुचिरुवाच ॥

परिग्रहोऽतिदुःखाय पापायाधोगतिस्तथा ।
भवत्यतो मया पूर्व्वं न कृतो दारसंग्रहः ॥ ९ ॥
आत्मनः संयमो योऽयं क्रियते सुनियन्त्रणात् ।
स मुक्तिहेतुर्नभवत्यसावपि परिग्रहात् ॥ १० ॥
प्रक्षाल्यतेऽनुदिवसं यदात्मा निष्परिग्रहैः ।
ममत्वपङ्कदिग्धोऽपि चित्ताम्भोभिर्व्वरं हि तत् ॥ ११ ॥
अनेकभवसंभूतकर्मपङ्काङ्कितो बुधैः ।
आत्मा सद्वासनातोयैः प्रक्षाल्यो नियतेन्द्रियैः ॥ १२ ॥

पितर ऊचुः ॥

युक्तं प्रक्षालनं कर्त्तुमात्मनो नियतेन्द्रियैः ।
किन्तु मोक्षाय मार्गोऽयं यत्र त्वं पुत्र वर्त्तसे ॥ १३ ॥
परन्तु दानैरशुभं नुद्यतेऽनभिसन्धितैः ।
फलैस्तथोपभोगैश्च पूर्व्वकर्मशुभाशुभैः ॥ १४ ॥
एवं न बन्धो भवति कुर्व्वतः करुणात्मकं ।
न च बन्धाय तत्कर्म भवत्यनभिसन्धितं ॥ १५ ॥
पूर्व्वकर्म कृतं भोगैः क्षीयतेऽहर्निशं तथा ।
सुखदुःखात्मकैर्व्वत्स पुण्यापुण्यात्मकं नृणां ॥ १६ ॥
एवं प्रक्षाल्यते प्राज्ञैरात्मा बन्धैश्च रक्ष्यते ।
न त्वेवमविवेकेन पापपङ्केन गृह्यते ॥ १७ ॥

रुचिरुवाच ॥

अविद्या पठ्यते वेदे कर्ममार्गः पितामहाः ।

तत्कथं कर्मणो मार्गे भवन्तो योजयन्ति मां ॥ १८ ॥

पितर ऊचुः ॥

अविद्या सत्यमेवैतत्कर्म नैतन्मृषा वचः ।
किन्तु विद्यापरिप्राप्तौ हेतुः कर्म न संशयः ॥ १९ ॥
विहिताकरणात् पुंभिरसद्भिः क्रियते तु यः ।
संयमो मुक्तये सोऽन्ते प्रत्युताऽधोगतिप्रदः ॥ २० ॥
प्रक्षालयामीति भवान् वत्सात्मानन्तु मन्यते ।
विहिताकरणोद्भूतैः पापैस्त्वन्तु विदह्यसे ॥ २१ ॥
अविद्याप्युपकाराय विषवज्जायते नृणां ।
अनुष्ठिताभ्युपायेन बन्धायान्यापि नो हि सा ॥ २२ ॥
तस्माद्वत्स कुरुष्व त्वं विधिवद्दारसंग्रहं ।
मा जन्म विफलं तेऽस्तु असम्प्राप्य तु लौकिकं ॥ २३ ॥

रुचिरुवाच ॥

वृद्धोऽहं साम्प्रतं को मे पितरः संप्रदास्यति ।
भार्य्यान्तथा दरिद्रस्य दुष्करो दारसंग्रहः ॥ २४ ॥

पितर ऊचुः ॥

अस्माकं पतनं वत्स भवतश्चाप्यधोगतिः ।
नूनं भावि भवित्री च नाभिनन्दसि नो वचः ॥ २५ ॥

मार्कण्डेय उवाच ॥

इत्युक्त्वा पितरस्तस्य पश्यतो मुनिसत्तम ।
बभूवुः सहसाऽदृश्या दीपा वाताहता इव ॥ २६ ॥

इति श्रीमार्कण्डेयपुराणे रुच्युपाख्याने ॥ ९५ ॥

षण्णवतितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

स तेन पितृवाक्येन भृशमुद्विग्नमानसः ।
कन्याभिलाषी विप्रर्षिः परिबभ्राम मेदिनीं ॥ १ ॥
कन्यामलभमानोऽसौ पितृवाक्याग्निदीपितः ।
चिन्तामवाप महतीमतीवोद्विग्नमानसः ॥ २ ॥
किं करोमि क्व गच्छामि कथं मे दारसंग्रहः ।
क्षिप्रं भवेत् मत्पितॄणां स चाभ्युदयकारकः ॥ ३ ॥
इति चिन्तयतस्तस्य मतिर्जाता महात्मनः ।
तपसाराधयाम्येनं ब्रह्माणं कमलोद्भवं ॥ ४ ॥
ततो वर्षशतं दिव्यं तपस्तेपे स वेधसः ।
आराधनाय स तदा परं नियममास्थितः ॥ ५ ॥
ततः स्वं दर्शयामास ब्रह्मा लोकपितामहः ।
उवाच तं प्रसन्नोऽस्मीत्युच्यतामभिवाञ्छितं ॥ ६ ॥
ततोऽसौ प्रणिपत्याह ब्रह्माणं जगतो गतिं ।
पितॄणां वचनात्तेन यत्कर्त्तुमभिवाञ्छितं ॥
ब्रह्मा चाह रुचिं विप्रं श्रुत्वा तस्याभिवाञ्छितं ॥ ७ ॥

ब्रह्मोवाच ॥

प्रजापतिस्त्वं भविता स्रष्टव्या भवता प्रजाः ।
सृष्ट्वा प्रजाः सुतान् विप्र समुत्पाद्य क्रियास्तथा ॥ ८ ॥
कृत्वा कृताधिकारस्त्वं ततः सिद्धिमवाप्स्यसि ।

स त्वं यथोक्तं पितृभिः कुरु दारपरिग्रहं ॥ ९ ॥
कामञ्चेममभिध्याय क्रियतां पितृपूजनं ।
त एव तुष्टाः पितरः प्रदास्यन्ति तवेप्सितान् ॥
पत्नीं सुतांश्च सन्तुष्टाः किन्न दद्युः पितामहाः ॥ १० ॥

मार्कण्डेय उवाच ॥

इत्यृषेर्वचनं श्रुत्वा ब्रह्मणोऽव्यक्तजन्मनः ।
नद्या विविक्ते पुलिने चकार पितृतर्पणं ॥ ११ ॥
तुष्टाव च पितॄन् विप्र स्तवैरेभिस्तथादृतः ।
एकाग्रः प्रयतो भूत्वा भक्तिनम्रात्मकन्धरः ॥ १२ ॥

रुचिरुवाच ॥

नमस्येऽहं पितॄन् श्राद्धे ये वसन्त्यधिदेवताः ।
देवैरपि हि तर्प्यन्ते ये च श्राद्धे स्वधोत्तरैः ॥ १३ ॥
नमस्येऽहं पितॄन् स्वर्गे ये तर्प्यन्ते महर्षिभिः ।
श्राद्धैर्मनोमयैर्भक्त्या भुक्तिमुक्तिमभीप्सुभिः ॥ १४ ॥
नमस्येऽहं पितॄन् स्वर्गे सिद्धाः सन्तर्पयन्ति यान् ।
श्राद्धेषु दिव्यैः सकलैरुपहारैरनुत्तमैः ॥ १५ ॥
नमस्येऽहं पितॄन् भक्त्या येऽर्च्यन्ते गुह्यकैरपि ।
तन्मयत्वेन वाञ्छद्भिर्ऋद्धिमात्यन्तिकीं परां ॥ १६ ॥
नमस्येऽहं पितॄन्मर्त्यैरर्च्यन्ते भुवि ये सदा ।
श्राद्धेषु श्रद्धयाभीष्टलोकप्राप्तिप्रदायिनः ॥ १७ ॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा ।
वाञ्छिताभीष्टलाभाय प्राजापत्यप्रदायिनः ॥ १८ ॥

नमस्येऽहं पितॄन् ये वै तर्प्यन्तेऽरण्यवासिभिः ।
वन्यैः श्राद्धैर्यताहारैस्तपोनिर्धूतकिल्बिषैः ॥ १९ ॥
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकव्रतचारिभिः ।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभिः ॥ २० ॥
नमस्येऽहं पितॄन् श्राद्धैः राजन्यास्तर्पयन्ति यान् ।
कव्यैरशेषैर्विधिवल्लोकद्वयफलप्रदान् ॥ २१ ॥
नमस्येऽहं पितॄन् वैश्यैरर्च्यन्ते भुवि ये सदा ।
स्वकर्माभिरतैर्नित्यं पुष्पधूपान्नवारिभिः ॥ २२ ॥
नमस्येऽहं पितॄन् श्राद्धैर्ये शूद्रैरपि भक्तितः ।
सन्तर्प्यन्ते जगत्यत्र नाम्ना ख्याताः सुकालिनः ॥ २३ ॥
नमस्येऽहं पितॄन् श्राद्धैः पाताले ये महासुरैः ।
सन्तर्प्यन्ते स्वधाहारास्त्यक्तदम्भमदैः सदा ॥ २४ ॥
नमस्येऽहं पितॄन् श्राद्धैरर्च्यन्ते ये रसातले ।
भोगैरशेषैर्विधिवन्नागैः कामानभीप्सुभिः ॥ २५ ॥
नमस्येऽहं पितॄन् श्राद्धैः सर्पैः सन्तर्पितान् सदा ।
तत्रैव विधिवन्मन्त्रभोगसम्पत्समन्वितैः ॥ २६ ॥

पितॄन्नमस्ये निवसन्ति साक्षात्
ये देवलोके च तथान्तरीक्षे ।
महीतले ये च सुरादिपूज्या-
स्ते मे प्रतीच्छन्तु मयोपनीतं ॥ २७ ॥
पितॄन्नमस्ये परमात्मभूता
ये वै विमाने निवसन्ति मूर्त्ताः ।

अर्चन्ति यानस्तमलैर्मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून्॥ २८॥
पितॄन्नमस्ये दिवि ये च मूर्त्ताः
स्वधाभुजः काम्यफलाभिसन्धौ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु॥ २९॥
तृप्यन्तु तेऽस्मिन् पितरः समस्ता
इच्छावतां ये प्रदिशन्ति कामान्।
सुरत्वमिन्द्रत्वमतोऽधिकं वा
सुतान् पशून् स्वानि बलं गृहाणि॥ ३०॥
सोमस्य ये रश्मिषु येऽर्कबिम्बे
शुक्ले विमाने च सदा वसन्ति।
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयै-
र्गन्धादिना पुष्टिमितो व्रजन्तु॥ ३१॥
येषां हुतेऽग्नौ हविषा च तृप्ति-
र्ये भुञ्जते विप्रशरीरसंस्थाः।
ये पिण्डदानेन मुदं प्रयान्ति
तृप्यन्तु तेऽस्मिन् पितरोऽन्नतोयैः॥ ३२॥
ये खड्गिमांसेन सुरैरभीष्टैः
कृष्णैस्तिलैर्दिव्यमनोहरैश्च।
कालेन शाकेन महर्षिवर्य्यैः
संप्रीणितास्ते मुदमत्र यान्तु॥ ३३॥

काम्यान्यशेषाणि च यान्यभीष्टा-
न्यतीव तेषाममरार्च्चितानां ।
तेषान्तु सान्निध्यमिहास्तु पुष्प-
गन्धान्नभोज्येषु मया कृतेषु ॥ ३४ ॥
दिने दिने ये प्रतिगृह्णतेऽर्च्चां
मासान्तपूज्या भुवि येऽष्टकासु ।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तृप्तिं ॥ ३५ ॥
पूज्या द्विजानां कुमुदेन्दुभासो
ये क्षत्रियाणाञ्च नवार्कवर्णाः ।
तथा विशां ये कनकावदाता
नीलीनिभाः शूद्रजनस्य ये च ॥ ३६ ॥
तेऽस्मिन् समस्ता मम पुष्पगन्ध-
धूपान्नतोयादिनिवेदनेन ।
तथाग्निहोमेन च यान्तु तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥ ३७ ॥
ये देवपूर्व्वाण्यतितृप्तिहेतो-
रश्नन्ति कव्यानि शुभाहृतानि ।
तृप्ताश्च ये भूतिसृजो भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥ ३८ ॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
निर्नाशयन्तस्त्वशिवं प्रजानां ।

आद्याः सुराणाममरेशपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥ ३९ ॥
अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं श्राद्धेऽस्मिन् पितरस्तर्पिता मया ॥ ४० ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशं ।
तथा बर्हिषदः पान्तु याम्यां ये पितरः स्मृताः ॥ ४१ ॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥ ४२ ॥
सर्व्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।
विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः शुभाननः ॥ ४३ ॥
भूतिदो भूतिकृद्भूतिः पितॄणां ये गणा नव ।
कल्याणः कल्यता कर्त्ता कल्यः कल्यतराश्रयः ॥ ४४ ॥
कल्यताहेतुरनघः षडिमे ते गणाः स्मृताः ।
वरो वरेण्यो वरदः पुष्टिदस्तुष्टिदस्तथा ॥ ४५ ॥
विश्वपाता तथा धाता सप्तैवैते तथा गणाः ।
महान्महात्मा महितो महिमावान्महाबलः ॥ ४६ ॥
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ।
सुखदो धनदश्चान्यो धर्मदोऽन्यश्च भूतिदः ॥ ४७ ॥
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयं ।
एकत्रिंशत्पितृगणा यैर्व्याप्तमखिलं जगत् ॥
ते मेऽनुतृप्तास्तुष्यन्तु यच्छन्तु च सदा हितं ॥ ४८ ॥

इति श्रीमार्कण्डेयपुराणे रुच्युपाख्याने ॥ ९६ ॥

## सप्तनवतितमोऽध्यायः ॥

मार्कण्डेय उवाच ॥

एवन्तु स्तुवतस्तस्य तेजसो राशिरुच्छ्रितः ।
प्रादुर्बभूव सहसा गगनव्याप्तिकारकः ॥ १ ॥
तत् दृष्ट्वा सुमहत्तेजः समासाद्य स्थितं जगत् ।
जानुभ्यामवनिं गत्वा रुचिः स्तोत्रमिदं जगौ ॥ २ ॥

रुचिरुवाच ॥

अर्च्चितानाममूर्त्तानां पितॄणां दीप्ततेजसां ।
नमस्यामि सदा तेषां ध्यानिनां दिव्यचक्षुषां ॥ ३ ॥
इन्द्रादीनाञ्च नेतारो दक्षमारीचयोस्तथा ।
सप्तर्षीणां तथान्येषां तान्नमस्यामि कामदान् ॥ ४ ॥
मन्वादीनां मुनीन्द्राणां सूर्य्याचन्द्रमसोस्तथा ।
तान्नमस्याम्यहं सर्व्वान् पितॄनप्सूदधावपि ॥ ५ ॥
नक्षत्राणां ग्रहाणाञ्च वाय्वग्न्योर्नभसस्तथा ।
द्यावापृथिव्योश्च तथा नमस्यामि कृताञ्जलिः ॥ ६ ॥
देवर्षीणां जनितॄंश्च सर्व्वलोकनमस्कृतान् ।
अक्षय्यस्य सदा दातॄन् नमस्येऽहं कृताञ्जलिः ॥ ७ ॥
प्रजापतेः कश्यपाय सोमाय वरुणाय च ।
योगेश्वरेभ्यश्च सदा नमस्यामि कृताञ्जलिः ॥ ८ ॥

नमो गणेभ्यः सप्तभ्यस्तथा लोकेषु सप्तसु ।
स्वयम्भुवे नमस्यामि ब्रह्मणे योगचक्षुषे ॥ ९ ॥
सोमाधारान् पितृगणान् योगमूर्त्तिधरांस्तथा ।
नमस्यामि तथा सोमं पितरं जगतामहं ॥ १० ॥
अग्निरूपांस्तथैवान्यान्नमस्यामि पितॄनहं ।
अग्नीषोममयं विश्वं यत एतदशेषतः ॥ ११ ॥
ये तु तेजसि ये चैते सोमसूर्य्याग्निमूर्त्तयः ।
जगत्स्वरूपिणश्चैव तथा ब्रह्मस्वरूपिणः ॥ १२ ॥
तेभ्योऽखिलेभ्यो योगिभ्यः पितृभ्यो यतमानसः ।
नमो नमो नमस्ते मे प्रसीदन्तु स्वधाभुजः ॥ १३ ॥

मार्कण्डेय उवाच ॥

एवं स्तुतास्ततस्तेन तेजसा मुनिसत्तम ।
निश्चक्रमुस्ते पितरो भासयन्तो दिशो दश ॥ १४ ॥
निवेदितञ्च यत्तेन पुष्पगन्धानुलेपनं ।
तद्भूषितानथ स तान् ददृशे पुरतः स्थितान् ॥ १५ ॥
प्रणिपत्य पुनर्भक्त्या पुनरेव कृताञ्जलिः ।
नमस्तुभ्यं नमस्तुभ्यमित्याह पृथगादृतः ॥ १६ ॥
ततः प्रसन्नाः पितरस्तमूचुर्मुनिसत्तमं ।
वरं वृणीष्वेति स तानुवाचानतकन्धरः ॥ १७ ॥

रुचिरुवाच ॥

साम्प्रतं सर्गकर्तृत्वमादिष्टं ब्रह्मणा मम ।
सोऽहं पत्नीमभीप्सामि धन्यां दिव्यां प्रजावतीं ॥ १८ ॥

पितर ऊचुः ॥

अत्रैव सद्यः पत्नी ते भवत्वतिमनोरमा ।
तस्याञ्च पुत्रो भविता भवतो मनुरुत्तमः ॥ १९ ॥
मन्वन्तराधिपो धीमांस्त्वन्नाम्नैवोपलक्षितः ।
रुचे रौच्य इति ख्यातिं यो यास्यति जगत्त्रये ॥ २० ॥
तस्यापि बहवः पुत्रा महाबलपराक्रमाः ।
भविष्यन्ति महात्मानः पृथिवीपरिपालकाः ॥ २१ ॥
त्वञ्च प्रजापतिर्भूत्वा प्रजाः सृष्ट्वा चतुर्विधाः ।
क्षीणाधिकारो धर्मज्ञ ततः सिद्धिमवाप्स्यसि ॥ २२ ॥
स्तोत्रेणानेन च नरो योऽस्मांस्तोष्यति भक्तितः ।
तस्य तुष्टा वयं भोगानात्मज्ञानं तथोत्तमं ॥ २३ ॥
शरीरारोग्यमर्थञ्च पुत्रपौत्रादिकन्तथा ।
वाञ्छद्भिः सततं स्तव्याः स्तोत्रेणानेन वै यतः ॥ २४ ॥
श्राद्धे च य इमं भक्त्या अस्मत्प्रीतिकरं स्तवं ।
पठिष्यति द्विजाग्र्याणां भुञ्जतां पुरतः स्थितः ॥ २५ ॥
स्तोत्रश्रवणसंप्रीत्या सन्निधाने परे कृते ।
अस्माकमक्षयं श्राद्धं तद्भविष्यत्यसंशयं ॥ २६ ॥
यद्यप्यश्रोत्रियं श्राद्धं यद्यप्युपहतं भवेत् ।
अन्यायोपात्तवित्तेन यदि वा कृतमन्यथा ॥ २७ ॥
अश्राद्धार्हैरुपहतैरुपहारैस्तथा कृतं ।
अकालेऽप्यथवाऽदेशे विधिहीनमथापि वा ॥ २८ ॥
अश्रद्धया वा पुरुषैर्दम्भमाश्रित्य वा कृतं ।